No. १२६९

Title धर्मतावच्छेदकता प्रत्यासत्तिः

Author

Extent २५ Age

Subject न्याय शास्त्रम्

धर्मितावच्छेदकताप्रत्यासत्तिः

१२५९

२५ पत्राणि

श्रीगणेशाय नमः ॥ अनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः सामानाधिकरण्यं तै
नैकपुरुषीयपरामर्शदशायां तद्भिन्नपुरु[illegible]षां तरस्यानुमितेस्तस्य समवायरूपकारणताघ
टकसंबंधेन परामर्शानधिकरणत्वात् ॥ नवीनास्तु ॥ समानधर्मितावच्छेदकत्वमनुमितिपराम
र्शयोः कार्यकारणभावघटकप्रत्यासत्तिः ॥ सामानाधिकरण्यप्रत्यासत्तिकल्पने पक्षधर्मावच्छि
न्नविशेष्यकपरामर्शदशायां अन्यधर्मावच्छिन्नविशेष्यकानुमित्यापत्तेर्वारणाय धर्मितावच्छेदका ५३
नां विशिष्य निवेशनीयतया धर्मितावच्छेदकभेदेन कार्यकारणभावबाहुल्यप्रसंगात् ॥ अस्मन्म
ते तु समानधर्मितावच्छेदकत्वप्रत्यासत्तेरेव नातिप्रसंगभंगात् धर्मितावच्छेदकमतिरे

शैपवव। अनुमितित्वावच्छिन्नंप्रति वह्निव्याप्यधूमवत्तानिर्णयत्वेन हेतुतया तद्रूपेण न कार्यकारणभा
वाधिकस्य। न चैवं तत्रान्येपि वह्निव्याप्यधूमवद्व्यं पर्वतो घटव्याप्यवान् इदं साक्षात्काररूपपरामर्शका
ले पर्वतो वह्निमानित्येतादृशानुमित्यापत्तिः। तादृशपरामर्शस्यापि धर्मितावच्छेदकसंबंधेन पर्वतत्वे ल३
सत्वादिति वाच्यं वह्निविधेयतानिरूपितविशेष्यतावच्छेदकतासंबंधेनानुमितिं प्रति वह्निव्याप्यधूमप्र
कारतानिरूपितविशेष्यतावच्छेदकताप्रत्यासत्त्या परामर्शस्य हेतुत्वकल्पनात् तादृशपरामर्शस्य
तादृशविशेष्यतावच्छेदकतासंबंधेन पर्वतत्वे सत्वेन तत्र पर्वतत्वावच्छिन्नविशेष्यतानिरूपितव
ह्निविधेयकानुमितेरापादनासंभवात्॥ न चैवं तत्र व्यापकपुरुषीयपरामर्शकाले अन्यस्यानुमि
तिवारणाय तत्पुरुषीयानुमितित्वावच्छिन्नंप्रति तत्पुरुषीयपरामर्शत्वेन हेतुता वाच्या इत्थं च पु २

चर्मि

रूपादिभेदेनन कार्यकारणभावबाहुल्यात्तल्लाघवावकाशादिति वाच्यं पुरुषापेक्षया विषयाणामधिक
नया विषयभेदेन कारणताबाहुल्यमपेक्ष्य पुरुषभेदेन बाहुल्यकल्पनाया एवोचितत्वात्। केचित्तु स
मवायसंबंधेन वह्निविधेयकानुमितिं प्रति समवायेन विशेष्यतावच्छेदकतासंबंधेन वह्निविधेयका
नुमितिं प्रति च विशेष्यतावच्छेदकत्वप्रसासस्यापरामर्शस्य हेतुताकल्प्याने ऽपनोनेकपुरुषीयप
रामर्शादन्यस्यानुमितेरेकधर्मावच्छिन्नविशेष्यकपरामर्शादन्यधर्मावच्छिन्नविशेष्यकानुमिते
र्वाऽपत्तिः। पर्वतमपि यदा चैत्रस्य पर्वतत्वावच्छिन्नविशेष्यको मैत्रस्य च द्रव्यत्वावच्छिन्नविशेष्यकः प
रामर्शस्तदा चैत्रस्य द्रव्यत्वावच्छिन्न[redacted]विशेष्यकानुमितेर्मैत्रस्य पर्वतत्वावच्छिन्नविशेष्यका
नुमितेश्चापत्तिः। समवायेन वह्न्यनुमितिजनकीभूतस्य वह्निव्याप्यवत्ताज्ञानस्य समवायेन चैत्रे म

त्वयोर्विशेष्यतावच्छेदकतासंबंधेनवह्न्यनुमितिजनकीभूतस्यचतस्यतादृशासंबंधेनद्रव्यत्वपर्वतत्व
योस्सत्वादितिचेन्न।एकधर्मावच्छिन्नप्रतिठुभयविधप्रसाससायत्र एकधर्मावच्छिन्नस्यहेतुतात्रवि
या०३ लक्षणैवसामग्रीव्याप्तिरभ्युपगन्तव्यनपानातादृशातिप्रसंगाभावात्।तथाहि।तद्धर्मावच्छिन्ननिष्ठयादृ
शासंबंधावच्छिन्नकार्यतानिरूपितस्यावच्छिन्नकारणताघटकप्रसाससायदधिकरणसंबद्धस्यका
रणतावच्छेदकावच्छिन्नस्यतद्धर्मावच्छिन्ननिष्ठयादृशासंबंधावच्छिन्नकार्यतानिरूपितस्याव
च्छिन्नकारणताघटकप्रसाससायधिकरणंपन्नत्तादृशासंबंधेनतदधिकरणसंबद्धतत्कार्यतावच्छे
दकावच्छिन्नस्यतेनाधिकरणमिसेवसामग्रीव्याप्तिंप्रकृतेस्वीकरणीयास्वंकारणतावच्छेदकं।
उपदर्शितस्थलेचचैत्रस्यपर्वतत्वावच्छिन्नविशेष्यकानुमितिंप्रतिसाध्यतेनैववह्न्यनुमितित्वावच्छिन्न २

धार्मे

निष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितास्त्वावच्छिन्नकारणताघटकप्रसासस्याचैत्रात्मप्रसासत्त्व
स्यवह्निव्याप्यवत्ताज्ञानस्यवह्न्यनुमितित्वावच्छिन्ननिष्ठविशेष्यतावच्छेदकत्वप्रसासस्यवच्छिन्नकार्यत्वां
तरनिरूपितस्त्वावच्छिन्नकारणताघटकीभूतविशेष्यतावच्छेदकत्वप्रसासस्यवह्नित्वाधिकरणतायाः
पर्वतत्वेसत्वात् तस्यसमवायेनचैत्रात्मसंबद्धवह्न्यनुमितित्वावच्छिन्ननिरूपितविशेष्यतावच्छेदकत्व
प्रसासस्यवह्नित्वाधिकरणत्वानुरूपभावात् एवमेतस्यद्रव्यत्वावच्छिन्नविशेष्यकानुमितिरूपपद्यते
ननुचैत्रादेर्द्रव्यत्वावच्छिन्नविशेष्यकानुमितिः समवायेनचैत्रादिसंबद्धस्यापिव्याप्यवत्ताज्ञानत्वाव
च्छिन्नस्यविशेष्यतावच्छेदकतासंबंधेनद्रव्यत्वादावसत्वात् द्रव्यत्वादेश्चैत्रादिसमवेतवह्न्यनुमिति
त्वावच्छिन्ननिरूपितविशेष्यतावच्छेदकताप्रसासस्यवह्नित्वाधिकरणतानियामकाभावादिति नत्सुरुसी

3

पत्वादिरूपमनिवेश्यैव विशेष्यतावच्छेदकत्वप्रसासमसा कार्यकारणभावकल्पनं संभवतीति वदंति। अत्रेदं चिंतया
मः। चैत्रस्य वह्निव्याप्यवान्पर्वत इत्येतादृशपरामर्शदशायां तस्य पर्वतो वह्निमानित्येतादृशासिद्धिः। एवं
पि पर्वतो वह्निमानित्येतादृशानुमित्यापत्तिः। समवायेन चैत्रात्मसमवेतस्य वह्निव्याप्यवत्ताज्ञानस्य
विशेष्यतावच्छेदकतया पर्वतत्वे सत्त्वात्। न च तत्कारणतावच्छेदकसंबंधेन तत्कारणतावच्छेदकाव
च्छिन्नाधिकरणत्वकारणतानिरूपितायाः कार्यतायास्तदाश्रयपर्याप्तिविशिष्टत्वनिष्ठतदवच्छेदकसंबंधा
वच्छिन्नकार्यतान्तर निरूपितकारणतावच्छेदकीभूतनिखिलधर्मावच्छिन्नविशिष्टत्वस्यापि निवेश
नीयत्वात्सिद्धांतदिकाले नानुमित्यापत्तिः। तदानीं समवायेन व्याप्यवत्ताज्ञानवतश्चैत्रस्य समवायसं
बंधावच्छिन्नव्याप्यवत्ताज्ञानिरोपनिष्ठकारणतानिरूपितकार्यतासमानाधिकरणत्वकार्यतावच्छेदक

धर्मि

समवायसंबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकयावदंतर्गततथाविधसिद्ध्यभावत्वावच्छिन्नवि
शिष्टत्वाभावादिति वाच्यं तथेदानींपर्वतोवह्निमानिसेनादृश्यासिद्ध्यभावासत्वेपिवह्निव्याप्यवत्ताज्ञान
त्वावच्छिन्नकारणतानिरूपितकार्यताश्रयद्रव्यत्वावच्छिन्नविशेष्यकवह्न्याद्यनुमित्यात्मकपत्किंचिद्वि
क्तिनिष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकीभूतद्रव्यत्वावच्छिन्नविशेष्यकसिद्ध्यभा
वत्वघटितानिरुक्तधर्मावच्छिन्नानां चैत्रात्मनिसत्वात्॥ अथ सिद्धेर्द्रव्यत्वावच्छिन्नविशेष्यकवह्निनिर्णय
त्वेन न प्रतिबंधकत्वं किंतु सामान्यतो विशेष्यतावच्छेदकत्वप्रसासत्वावह्निविधेयकानुमितित्वावच्छिन्नं
प्रतिविशेष्यतावच्छेदकतासंबंधेन वह्निनिर्णयत्वेनैव प्रतिबंधकता कल्प्यते। द्रव्यं न विशेष्यतावच्छे
दकताप्रसासत्वावह्निव्याप्यवत्ताज्ञानिर्णयाधिकरणपर्वतत्वेनादृश्यासंबंधावच्छिन्नकारणतानिरूपि

नकापितावच्छेदकीभूतविशेष्यतावच्छेदकतासंबंधावच्छिन्नकार्यताश्रयपर्याप्तिकिंचिद्व्यक्तिनिष्ठकार्यतानिरूपि
तकारणतावच्छेदकीभूतविशेष्यतावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकवह्निनिर्णयत्वावच्छिन्नाभा
वत्वावच्छिन्नासत्तान्न तत्र विशेष्यतावच्छेदकतत्प्रत्यासत्त्या वह्न्यनुमितित्वावच्छिन्नापत्तिरिति चेन्न। सामा
न्यतो वह्न्यनुमितित्वावच्छिन्नं प्रति वह्निनिर्णयत्वावच्छिन्नाभावत्वेन हेतुता न संभवति। पुरुषान्तरीयपर्व
तत्वावच्छिन्नविशेष्यकवह्निमत्तानिर्णयकालीनपर्वतत्वावच्छिन्नविशेष्यकवह्न्यनुमितौ व्यभिचारात्।
किंतु तत्पुरुषीयवह्न्यनुमितित्वावच्छिन्नं प्रति तत्पुरुषीयवह्निमत्तानिर्णयत्वावच्छिन्नाभावत्वेन हेतु
तावाच्या एवं च चैत्रस्य पर्वतो वह्निमानित्येतादृशसिद्धिकालेपि वह्निव्याप्यवत्तानिर्णयत्वावच्छिन्नका
रणतानिरूपितकार्यताश्रयीभूतपुरुषान्तरीयपर्याप्तिकिंचिद्वह्न्यनुमितिनिष्ठकार्यतानिरूपितकारण ४
धमि

तावच्छेदकीभूततत्पुरुषीयवह्निमत्तानिर्णये त्वावच्छिन्नाभावत्वघटितयावद्धर्मावच्छिन्नानां पर्वतत्वे सत्त्वान्न
त्रविशेष्यतावच्छेदकत्वप्रत्यासत्त्यानुमित्यापत्तेर्ब्रह्मणो वा ऽपि तु मत्राक्यत्वाहूततत्पुरुषीयवह्न्यनुमि
तित्वावच्छिन्नं प्रति तत्पुरुषीयवह्निव्याप्यवत्तानिर्णयत्वेन हेतुत्वे च चैत्रीयवह्निव्याप्यवत्तानिर्णयत्वाव
च्छिन्नकारणतानिरूपितकार्यतानाश्रययत्किंचिदनुमितित्वव्यक्ति चैत्रीयेतत्तन्निष्ठकार्यतानिरूपितका
रणतावच्छेदकयावन्तो धर्मास्तदन्तर्गतं चैत्रीयवह्निमत्तानिर्णयाभावत्वमपि तदवच्छिन्नस्य चैत्री
यपर्वतत्वावच्छिन्नविशेष्यकवह्निमत्तानिर्णयरूपायाः पर्वतत्वेऽसत्त्वान्न तेन तदा विशेष्यतावच्छेदकता
प्रत्यासत्त्या न तत्रानुमितित्वावच्छिन्नापत्तिरिति तत्पुरुषीयत्वनिवेशनमनावश्यकमिति॥ अत्रेदं समाधा
नमाकलयामः॥ न तद्धर्मावच्छिन्नयत्किंचिद्व्यक्तिनिष्ठयत्संबंधावच्छिन्नकार्यतानिरूपितत्वेन तत्कारण
तावच्छेदकीभूता यावन्तो धर्माः प्रत्येकं तदवच्छिन्नकूटविशिष्टतदधिकरणत्वसंबंधावच्छिन्नतद्व्यक्ति

निष्ठकार्यतानिरूपितस्वावच्छिन्नकारणताघटकप्रत्यासत्त्यासत्त्वस्य पक्षे किंचिद्धर्मावच्छिन्नस्य तद्व्याप्तिनिष्ठतत्संबं
धावच्छिन्नकार्यतां तन्निरूपितस्वेतरावच्छिन्नकारणतावच्छेदकीभूतायावन्तो धर्माः प्रत्येकं तद्धर्मावच्छिन्नकूटवि
शिष्टं सद्भूतत्संबंधावच्छिन्नतद्व्याप्तिनिष्ठकार्यतानिरूपितस्वावच्छिन्नकारणताघटकप्रत्यासत्त्याधिकरणप
5 यन्तत्संबंधेन तदधिकरणप्रत्यासत्त्वेन तद्धर्मावच्छिन्नस्य तत्संबंधेन अधिकरणमित्येव सामग्रीव्याप्तिरूपेपत
।एवं चैवं चैत्रस्य वह्निव्याप्यधूमवानयं न इति परामर्शकाले पर्वतो वह्निमानित्सनाहत्रासिद्धिकाले पुरुषान्तरीय
यत्किंचिदनुमितिनिष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितनिरवच्छिन्नकारणतावच्छेदकावच्छिन्नविशिष्टं
नचैत्रात्मनः तादात्म्यसमवेतत्वावच्छिन्नं प्रति तादात्म्येन तादात्म्यप्रत्यासत्त्या हेतुतायाः कल्पनात्तादात्म्यत्वस्या
पितादृशकारणतावच्छेदकयावद्गतत्वाच्चैत्रात्मनश्च तादात्म्यसंबंधेन तादात्म्यत्वावच्छिन्नासंबंधित्वाद्धि कि
तु चैत्रीयपक्षे किंचिदनुमितिनिष्ठसमवायसंबंधावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकयावद्धर्माव ५
च्छिन्नविशिष्टत्वमेव तस्य तद्व्याप्तिनिष्ठविशेष्यतावच्छेदकसंबंधावच्छिन्नकार्यतानिरूपितकारणताव धर्मि

च्छेदकयावद्धर्मावच्छिन्नविशिष्टसंचननदापर्वतत्वस्य विशेष्यतावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताक चैत्रीयवह्नि
मत्तानिर्णयाभावस्यापि तदंतर्गतत्वात् तदवच्छिन्नस्य तदानीं पर्वतत्वेऽसत्त्वादिति। न चैत्रसंबद्धानुमितेर्विशेष्यता
वच्छेदकताप्रसासस्यापर्वतत्वेऽव्यापत्तिरिति। न तदात्मसमवेतत्वावच्छिन्नप्रतितादात्म्येन तदात्मत्वेन हेतु
तायां मानाभावादेवतादृशारीत्यापत्तिवारणं न संभवतीति वाच्यं। विषयभेदेन कोऽप्यनंतकारणतायां
न सुरूपीयत्वनिवेशापेक्षया विषयमनिवेश्य तादृशाकारणतायाः कल्पनस्यैवोचितत्वादिति कृतं विस्तरेण। अथ पक्षता
वच्छेदकसामानाधिकरण्यमात्रावगाहि हेतुमत्ताज्ञानासत्त्वनावच्छेदकावच्छेदेनानुमितेरनुत्पत्त्यापर्वतत्वादिव्याप
कतासंसर्गकानुमितित्वावच्छिन्नं प्रति पर्वतत्वादिव्यापकतासंसर्गकहेतुमत्ताज्ञानत्वेन हेतुतावाच्यात्वं च पर्वतत्वा
दिनिवेशस्यावश्यकतया कृतं विशेष्यतावच्छेदकत्वप्रसासन्निस्वीकारेण। न च विशेष्यतावच्छेदकत्वप्रसासस्तत्मु
पगमे पर्वतत्वव्यापकतासंसर्गकत्वं निवेश्यैव पर्वतत्वद्रव्यत्वाद्यनंतधर्मभेदेन कारणताकल्पनीया। तदुपगमे च
तादृशासंसर्गकस्थलेऽपकमेव कारणत्वमिति वाच्यं। पक्षतावच्छेदकावच्छिन्नत्वावगाहि हेतुमत्ताज्ञानासत्त्वताव

छेदकावच्छिन्नत्वावगाहिन्यानुमितेरेवोत्पत्तिनयामहानसवाधवच्छिन्नपक्षकपर्वतत्वावगाहिहेतुमत्ताज्ञानानादृत्यानुमितेरप्रा
माणिकत्वादस्मन्मतेयं चैव कार्यकारणभावकल्पनाहानपर्वतत्वादिकमनिवेश्यव्यापकतासंसर्गकत्वमात्रं कार्यकारण
6 भावेनिवेशनीयमितिवाच्यं। पर्वतहृत्सभावप्रतियोगितावच्छेदकधर्मावच्छिन्नत्वरूपव्यापकेनापानिवेशनेतद्दूषकीभू
तपर्वतत्वादेरपिनिवेशनस्यावश्यकत्वात्। यदिच पर्वतत्वादिकमनिवेश्यपर्यकिंचिद्वृत्त्यभावप्रतियोगितावच्छेदकत्व
त्या। वह्नित्वाभावनिष्ठावच्छेदकतानिरूपितवह्नित्वनिष्ठावच्छेदकनिरूपकं यद्वह्निनिष्ठावच्छेदत्वंतन्निरूपकं यत्संयोगा
दिसंसर्गनिष्ठावच्छेदकत्वंतन्निरूपकवह्नित्वावच्छिन्नविधेयतानिरूपितविशेष्यतावच्छेदकतासंबंधेनानुमिति
त्वावच्छिन्नं प्रतितादृशाभावनिष्ठावच्छेदकतानिरूपितधूमत्वनिष्ठावच्छेदकत्वनिरूपिता। धूमनिष्ठावच्छेदकत्वतन्नि
रूपितसंयोगादिनिष्ठावच्छेदकत्वतन्निरूपितवह्निव्याप्यधूमत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबं
धेनपरामर्शस्यहेतुतासंभवेनतदामहानसत्वव्यापकताघटितसंसर्गावगाहिनः पर्वतत्वावच्छिन्नविशेष्यकपरामर्शा ६
दपिपर्वतत्वावच्छेदेनवह्न्यनुमितेरापत्तिरिति। अत्र केचित्तद्धर्मावच्छिन्नविशेष्यतासंबंधेनतद्धर्मव्यापकतायाए धर्मि

वसंसर्गतयाभानमभ्युपेयते नापरधर्मव्यापकतया॥ इत्थं च पर्वतत्वावच्छिन्नविशेष्यताकबुद्धेर्महानसत्वव्यापकताघटितसंस
र्गानवगाहित्वादुक्तातिप्रसंगाभावेन पक्षे साध्युपदर्शितरीतिरेव निःसाधीयसे साधुः॥ अन्ये तु वह्नित्वावच्छिन्नविरूपविधेयतानिरू
पितत्वसंयोगनिष्ठावच्छेदकतानिरूपितवह्निनिष्ठावच्छेदकतानिरूपितवह्नित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकता
निरूपितावच्छेदकनिष्ठावच्छेदकतानिरूपितप्रतियोगित्वनिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेदकतानिरूपितआधे
यत्वनिष्ठावच्छेदकतानिरूपितअधिकरणनिष्ठअवच्छेदकतानवच्छेदकत्वप्रकारकसाध्यानुमितित्वावच्छिन्नं प्रति वह्निव्याप्यधूमप्र
कारतानिरूपितसंयोगसंसर्गनिष्ठावच्छेदकतानिरूपितधूमनिष्ठावच्छेदकतानिरूपितधूमत्वनिष्ठावच्छेदकतादृशसंबंधप्र
णाधिकरणनिष्ठावच्छेदकतापर्यन्तं निवेश्य तदवच्छेदकत्वप्रकारकसाध्यपरामर्शस्य हेतुत्वान्तरकल्पनान्नोक्तातिप्रसंगः॥ न
५८ चैवं पर्वतत्वधर्मितावच्छेदकीकृत्य नीलपर्वतत्वव्यापकताघटितसंसर्गावगाहिनः परामर्शात्तादृशव्यापकत्वावगाहि सिद्धि
कालेऽशुद्धपर्वतत्वव्यापकतासंसर्गकानुमित्यापत्तिरिति वाच्यं। स्वनिरूपकावच्छेदकतानिरूपितस्वसंबंधेनावच्छेदकताविशि
ष्टव्याप्यावच्छेदकत्वस्य नायएव प्रसासनिवेशोपगमात्। तादृशस्थले च पर्वतत्वनिष्ठावच्छेदकतायाः तादृशसंबंधेन नीक

१८८ नीष्ठावच्छेदकताविशिष्टत्वेनापत्त्यभावात् न च सर्वासामेवावच्छेदकतानां तादृशसंबंधेन स्वात्मकावच्छेदकताविशिष्टत्वात् तदन्यावच्छे
दकत्वाप्रसिद्धमिति वाच्यं। संयोगस्यैव स्वनिष्ठावच्छेदकतानिरूपितत्वादेरपि स्वस्मिन् स्वसंबद्धत्वानुपगमेनानुपपत्त्यभावात् न चै
वमपि पर्वतत्वस्याभावप्रतियोगितानवच्छेदकत्वात् कथं हि ज्ञानात्पर्वतत्वावगाहिन्यनुमित्यापत्तिः आधेयत्वातिरिक्तधर्मानवच्छिन्न
त्वस्याभावनिष्ठावच्छेदकतायां निवेशेपि पर्वतत्वे नित्यस्य व्योमहानसवृत्तिरभावस्य तत्प्रतियोगितानवच्छेदकत्वग्रहाहात् तादृशानु
मित्यापत्तिर्दुर्वारैवेति वाच्यं। आधेयत्वनिष्ठावच्छेदकतायामपि तादृशसंबंधेनाभावत्वान्यनिष्ठावच्छेदकताविशिष्टान्यत्वं निवेश्य
तादृशापत्ते निरसनीयत्वादित्याहुः। अत्रेयमनुपपत्तिर्विभावनीया यत्र पर्वतत्वधर्मितावच्छेदकीकृत्य सत्पुरुषसंयोगेन महानसत्वव्या
पकधूमसंयोगे वा धूमवत्तानिर्णयः महानसत्वधर्मितावच्छेदकीकृत्य पर्वतत्वव्यापकताविशिष्टधूमसंयोगेन धूमवत्तानिर्णयश्च
तत्र पर्वतत्वं धर्मितावच्छेदकीकृत्य पर्वतत्वव्यापकीभूतवह्निसंयोगेन वह्न्यनुमित्यापत्तिः निरुक्तावच्छेदकत्वप्रत्यासत्त्या विशेष्यता
वच्छेदकत्वप्रत्यासत्त्या च पर्वतत्वे धूमपरामर्शस्य सत्त्वादिति। अत्रेदं ध्येयं। तादृशावच्छेदकतासंबंधेनानुमितिं प्रति धूमप्रकारता ७
विशिष्ट्याविशेष्यतानवच्छेदकत्वसंबंधेन परामर्शो हेतुः विशेष्यतायां धूमप्रकारतावैशिष्ट्यं च स्वनिरूपितसंयोगनिष्ठाव धर्मि

च्छेदकतानिरूपितायाधूमनिष्ठावच्छेदकतायास्तन्निरूपितायाधूमत्वनिष्ठावच्छेदकता। नतन्निरूपितायाअभावनिष्ठावच्छेदकतानतन्निरू
पितायाःप्रतिवंधकतावच्छेदकत्वनिष्ठावच्छेदकताइत्येवंक्रमेणावधिकरणनिष्ठावच्छेदकत्वपर्यंतंनिवेशपनदवच्छेदकतावच्छिन्नत्वसनिरू
पितत्वोभयसंबंधेननिवेशंउपदर्शितस्थलेचपर्वतत्वावच्छिन्नविशेष्यतानतादृशोभयसंबंधेनधूमप्रकारताविशिष्टानत्वमहा
नसत्वेव्यापकताविशिष्टधूमसंयोगस्यपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमप्रकारतावच्छेदकतयातादृशधूमप्रकारतानि
रूपितत्वंपर्वतत्वावच्छिन्नविशेष्यतायांपरंपरयातादृशधूमप्रकारतानिरूपिताऽधिकरणनिष्ठावच्छेदकतानदवच्छेदकत्वस्यमहा
नसत्वपवसत्वात्सर्वेनत्वावच्छिन्नविशेष्यतायास्तदवच्छिन्नत्वाभावादितिपर्वतत्वेनतादृशधूमप्रकारताविशिष्टविशेष्यताव
च्छेदकतासंबंधेनपरामर्शोवर्त्ततइतिनतादृशावच्छेदकतासंबंधेनानुमितिस्यापत्तिरिति। अथविशेष्यतावच्छेदकमनिवेश्यनिर्णी
यत्वस्यदुर्वचतयातन्निवेशस्यावश्यकतयानादृशविशेष्यतावच्छेदकताप्रसासस्तिकल्प्यलाघवानवकाशः। तथाहिवह्निव्याप्यधूम
वज्ज्ञाननिर्णीयत्वंयदिधूमाभावाप्रकारकत्वेसतिधूमप्रकारकत्वंतदामहानसंधूमाभाववत्पर्वतोवह्निव्याप्यधूमवानित्येतादृशज्ञा
नासंग्रहः। तादृशज्ञानस्यापिमहानसत्वविशिष्टधूमाभावप्रकारकत्वात्। नापिवह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यतावच्छे

तादृश विशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्व

ब

दकावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशून्यत्वे सति वह्निव्याप्यधूमप्रकारकत्वं तादृशज्ञानीयधूमाभावप्रकारतायामपि महा
नसत्वावच्छिन्नविशेष्यकधूमवत्ताज्ञानीयधूमप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वेन तस्यैवासंग्रहा
त्। तादृशधूमाभावप्रकारताशालित्वं तादात्म्याभयसंबंधेन धूमाभावज्ञानविशिष्टान्यत्वनिवेशेपि वह्निव्याप्यधूमवन्न वा महान
४ सं वह्निव्याप्यधूमवान्न वेत्यादिसंशयासंग्रहः। तस्य तथाविधोभयसंबंधेन स्वात्मकधूमाभाववत्ताज्ञानविशिष्टत्वाद्महानु
स्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशून्यत्वस्यावच्छिन्नविशेष्यतानिरूपितधूम [redacted] प्रकारताशालित्वोभयसंबंधे
न किंचिद्धूमविशिष्टज्ञानत्वमेव प्रकृतेऽनिर्णयत्वं वह्निव्याप्यधूमवन्न वा महानसं वह्निव्याप्यधूमवान्न वेत्यादिसमूहालंबनस्य त
निरुक्तोभयसंबंधेन पर्वतत्वविशिष्टत्वात्तत्संग्रहः इति चेत् अस्तु तादृशानिर्णयत्वं समूहालंबनसाधारणं विशिष्यविशेष्य
तावच्छेदकमनिवेश्य एव तथापि एतादृशरूपेण हेतुत्वं न संभवति तथा सति तादृशसमूहालंबनात्मकस्य निर्णयस्य वह्नि
व्याप्यधूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन महानसत्वादावपि सत्वात् तदनंतरं महानसं वह्निमदित्यनुमित्यापत्तेः। एवं
च तादृशसमूहालंबनरूपव्यावृत्तस्य पक्षजनकतावच्छेदकत्वेन तादृशत्वे पर्वतो वह्निमानित्येतादृशानुमित्यनुपपत्तिः। तत्साधारण ८
रूपस्य तथात्वे उक्तातिप्रसंग इति कथंचिदपि न निस्तार इति। अत्र केचिदाहुः। अत्र वह्न्यादिकारणतावच्छेदककोटौ निर्णयत्वं धर्मि

रूपद

११

नन्वेवमपेक्षितसंशयानन्तरमनुमित्यापत्तिवारणाय कारणतावच्छेदकप्रत्यासत्तिघटकधूमादिप्रकारतानिरूपितविशेष्यतायां धूमाभावा
दिप्रकारतानिरूपितत्वनिवेशनेन तथाच धूमाभावप्रकारतानिरूपितधूमप्रकारतानिरूपितविशेष्यतावच्छेदकत्वप्रत्यासत्त्यानुबद्धज्ञानत्वे
नैव हेतुता। न च प्रकारभेदेन विशेष्यताभेदान्निर्विकल्पज्ञानीयधूमप्रकारतानिरूपितविशेष्यतायामेव धूमाभावप्रकारतानिरूपि
तत्वात् शङ्क्या विशेषणमव्यावर्तकमिति वाच्यं। संशयप्रकारभेदेन विशेष्यताभेदानभ्युपगमात्। न चोभयप्रकारतानिरूपितवि
शेष्यतायाः संशयातिरिक्तज्ञानेऽक्षमतया संशयेऽतिरिक्तविषयतानभ्युपगम इति वाच्यं। प्रसक्तकोटिकज्ञानीयविशेष्यतातोऽतिरिक्ता
पा८ या विशेष्यतायाः संशयेऽनभ्युपगमेन संशयसमुच्चययोर्वैलक्षण्यस्यानुपपत्तेरलौकिकस्य नावच्छेदकत्वात्। न च समुच्चयाविषय
स्यैकोऽर्थः परस्परविरोधस्य संशयप्रयोजकतया नैतावतनस्य समुच्चयवैलक्षण्योपपत्तेरतिरिक्तविषयतानां मानाभाव इति वाच्यं। विरोधो
पस्थितिं विनापि विशेषदर्शनकोटिस्मरणधर्मिज्ञानादितः संशयस्यानुभवसिद्धत्वान्निखिलसंशयानां विरोधविषयत्वासंभ
वात्। अत एव दीधितिकारेणापि क्वचिद्विरोधभानस्यापि तत्प्रयोजकाधीनत्वादिस्वत्वक्वचिदिरूपेत्युक्तं। संशये विरोधस्यैकोऽ
धिकरण्ययोः संसर्गघटकतया भानाभ्युपगमात्। संसर्गज्ञानस्य च विशिष्टबुद्ध्यहेतुत्वात्। निखिलसंशयानामेव विरोधोधिविष
यत्वं संभवतीति किमतिरिक्तविषयताकल्पनेनेति। तदसत्। संसर्गविधया विरोधविषयताया अप्रामाणिकत्वात्। संशयस

कतर

शुद्धपर्यो वैलक्षण्यानुपपत्त्यानस्त्र स्यवे किमपराद्धमुभयप्रकारतानिरूपितविशेष्यतया। अथ निर्विकल्पसंशयानामुभयप्रकारता
निरूपितैकविशेष्यताशालित्वं न संभवति। नीलपर्वतत्वधर्मितावच्छेदकीकृत्य सवह्निव्याप्यधूमाभावं शुद्धपर्वतत्वधर्मितावच्छे
दकीकृत्य सवनद्वच्छेदेन वह्निव्याप्यधूममवगाहमानस्य संशयस्य न तथात्वात्। ये ग्राह्या तत्र धूमप्रकारतानिरूपितविशेष्यता
१ याः नीलत्वावच्छिन्नत्वात् तद्वच्छिन्नधूमाभावप्रकारतानिरूपितविशेष्यतातो भिन्नत्वात् तत्र धूमप्रकारतानिरूपितविशेष्यतायाः नी
लावच्छिन्नत्वोपगमे नीलविशिष्टपर्वतत्वं धर्मितावच्छेदकीकृत्योभयकोटिमवगाहमानस्य संशयस्य ततो वैलक्षण्यानुपपत्तेः। न
च तत्र धूमप्रकारतानिरूपितविशेष्यतातो धूमाभावप्रकारतानिरूपितनीलविशिष्टपर्वतत्वावच्छिन्नविशेष्यता भिन्नैव
स्यात् परं तु नीलपर्वतत्वावच्छिन्नविशेष्यतायाद्वधूमप्रकारतानिरूपितशुद्धपर्वतत्वावच्छिन्नविशेष्यतायाः अपि धूमा
भावप्रकारतानिरूपितत्वस्वीक्रियते इतीतानानुपपत्तिरिति वाच्यं तथा सति तादृशसंशयात् शुद्धपर्वतत्वं धर्मितावच्छेदकीकृ
त्योभयकोटिमवगाहमानस्य संशयस्यैव लक्षण्यानुपपत्तिरिति। विरोधिसामग्रीदशायां नीलपर्वतत्वावच्छिन्नविशेष्यतानि
रूपितधूमाभावप्रकारताशालि ज्ञानं जायतामिति सेनादृशेच्छासत्त्वे तादृशाहार्यज्ञानानुदयप्रसंगस्यैव। शुद्धपर्वतत्वावच्छिन्नविशेष्य
तानिरूपितधूमाभावप्रकारताशालिमत्त्वे स पर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताशालिज्ञानं जा धर्मि

यत्तामित्येतादृशोज्ञानादृशोज्ञायायत्तद्रूपेणतेनैकीकृत्यविरोधिसामग्र्याः प्रतिबंधकत्वं कल्प्यनादृशोनादृशोज्ञानसाधारणरूपेणोतेनैज
कत्वेनतथाविधेज्ञासत्वेनीलभासकसामग्र्यासत्वेशुद्धपर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यधूमाभावप्रकारकप्रसक्तापत्तेः। न च नील
पर्वतोधूमाभाववान्नपीनपर्वतोधूमवानित्याकारकसमूहालंबनवन्नीलपर्वतोधूमाभाववान्नपर्वतोधूमवानित्येतादृशज्ञानमपि
न संशयइतिवाच्यं नस्यानिर्णयत्वेकार्यकालपर्वतत्वावच्छेदेनधूमवत्तानिर्णयस्यविरोधिनः सत्तान्नीलपर्वतत्वं धर्मितावच्छेदकीकृत्य
धूमाभाववत्ताज्ञानानुदयप्रसंगादितिवाच्यं। मेवंतादृशसंशयेपिउभयप्रकारतानिरूपितैकैवविशेष्यताकिंतुतस्याः पर्वतत्वावच्छि
न्नत्वेनधूमप्रकारतानिरूपितत्वं नीलावच्छिन्नत्वविशिष्टपर्वतत्वावच्छिन्नत्वरूपेणधूमाभावप्रकारतानिरूपितत्वमित्येतिविशेषः। नीलपर्व
तोधूमवान्नवेत्यादिसंशयीयविशेष्यतायाश्चैकरूपेणोभयप्रकारतानिरूपितत्वेतिनेषांवैलक्षण्योपपत्तिरितिचेन्न। अत्रेदंविभाव
नीयंसंशयसमुच्चययोर्वैलक्षण्योपपत्तयेउभयप्रकारतानिरूपितमतिरिक्तविषयत्वमास्थांसंशयेकिंतुतत्रप्रसक्तप्रकारतानिरूपि
तविशेष्यतादृरूपस्यैवबाधकाभावेनतद्योजकसामग्र्याप्रतिसत्त्वाह्नानत्वेनतदवच्छिन्नप्रतिसंशयसामग्र्याः प्रतिबंधकत्वकल्पनान्तसंभवा
अतुसामग्र्यवत्त्वेनास्तीतिवाच्यंतत्रसंशयसामग्र्यास्तथात्वमानाभावात्। न च प्रसक्तनिरूपितविशेष्यतादृरूपस्यसंशयेस्वीकारेसंश

प्रकारता

यात्समुच्चयस्यैव लक्षणस्यानुपपत्तिः। निश्चयवृत्ति विषयतया तत्राभावादिति। अन्यथानुपपत्त्या तादृशसामग्रीप्रतिबंधकत्वं कल्पनमिति चेत् यदा सं
शयविलक्षणविषयतायाः समुच्चये सत्वेपि संशयत्वनिष्ठविलक्षणविषयतायास्तत्राभावेन तस्य संशयवैलक्षण्योपपत्तेः। संशयव्यावृत्त
मु विषयताशालित्वरूपवैलक्षण्यं समुच्चये ऽनुभूयत इति तत्र च शपथमंतरेण नाश्वासः इति। एवं च धूमादिसंशयस्यापि धूमाभावप्रका
रतानिरूपितधूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन पर्वतत्वादौ सत्वात्तेनोऽमितापत्तिर्दुर्वारैवेति। एतेन निश्चितसं
10 शये तु विरोधः संसर्गतयाभासते न त्वन्यत्र तथा च विरोधावच्छिन्नसंयोगनिष्ठावच्छेदकतानिरूपितधूमप्रकारताविशेष्यताव
च्छेदकतासंबंधेन परामर्शस्य हेतुत्वकल्पनान्न संशयानंतरमनुमित्यापत्तिः। निश्चयपि परामर्शे संशयस्य विरोधावच्छिन्नसंयोगादि
संसर्गकत्वेपि शुद्धसंयोगावच्छिन्नधूमप्रकारताशालितेषां धर्मभावान्न तदनंतरमनुमित्यापत्तेर्वारणसंभवात्। विरोधस्य संसर्गतया
भानेमानाभावात्। संशयमात्रे विरोधस्य संसर्गतयाभानाभ्युपगमे विरोधघटितसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतायाः पक्षको
टिज्ञानसाधारण्याभावात्। उभयप्रकारतानिरूपितताद्दशविशेष्यतयोरभेदस्यैव कल्प्यत्वेपि नुमितितन्नयामसंयोगनिष्ठावच्छेदकतायां
ज्ञानापदार्थघटितविरोधावच्छिन्नत्वनिवेशानपेक्षधूमप्रकारतानिरूपितविशेष्यतायाममभावप्रकारतानिरूपितत्वनिवेशस्यैव पु त १०
क्तत्वात्। न चोपदर्शितापा अनुपपत्तेः प्रकृतेपि तुल्यत्वादिति समसमूहे ... विशेषास्तु निरूपकज्ञाननिरूपितत्वस्यावच्छेदकावच्छिन्न धर्म

देशमयसंवंधेन धूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टाया विशेष्यतान्तरस्य धूमप्रकारतानिरूपितविशेष्यतावच्छेदकत्वं कारणताघ
टकसमासत्तिः। वह्निव्याप्यधूमवान्पर्वत इत्यादिसंशयात्मकज्ञानीयधूमप्रकारतानिरूपितविशेष्यता च तथाविधोभयसंवंधेन तदीय
धूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टैवेति नानुपपत्तिः। निश्चयात्मकज्ञानीयविशेष्यतायाः स्वपि स्वावच्छेदकावच्छिन्नत्वसंवंधेन सं
शयात्मकज्ञानीयधूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टत्वात् स्वनिरूपकज्ञाननिरूपितत्वनिवेशात् ज्ञानभेदेन च विषयता
व भेदोपगमात् नानुपपत्तिः। धूमवान् वा महानसं धूमवान्पर्वत इत्येतादृशज्ञानीयधूमप्रकारतानिरूपितपर्वतनिष्ठविशेष्यतायाः स्वपि
स्वनिरूपकज्ञाननिरूपितत्वसंवंधेन तदीयधूमाभावप्रकारतानिरूपितमहानसत्वावच्छिन्नविशेष्यताविशिष्टत्वात् स्वावच्छेदकावच्छिन्न
निवेशः। अथ नीलपर्वतत्वावच्छेदेन धूमाभावं शुद्धपर्वतत्वसामानाधिकरण्येन च धूममवगाहमानसमूहालंवनवोधसत्त्वेन नीरूप
वद्वह्निमानित्येतादृशानुमित्यनुपपत्तिः। तादृशज्ञानीयधूमप्रकारतानिरूपितविशेष्यतायाः तदीयधूमाभावप्रकारतानिरूपितवि
शेष्यतावच्छेदकावच्छिन्नत्वोभयसंवंधेन तादृशविशेष्यताविशिष्टत्वात् न च धूमाभावप्रकारता निरूपितविशेष्यतायां धूमाभा
वत्वानवच्छिन्नप्रकारतानिरूपितत्वं किंचिद्धर्मावच्छिन्नविशेष्यताभिन्नत्वे निवेश्यमनुपपत्तिः। तादृशज्ञानीयधूमाभावप्रकारतानि
रूपितविशेष्यतायाः धूमाभावत्वानवच्छिन्ननीलप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताभिन्नत्वादिति वाच्यं एवं सति नी

लपर्वतत्वावच्छेदेन धूमाभावप्रकारकाहृभुद्दपर्वतत्वावच्छेदेन धूमप्रकारकात्संशयादप्यनुमित्यापत्तिरिति तन्नावच्छेदकावच्छेदेन हेतुम
त्ताज्ञानस्य सामानाधिकरण्येन हेतुमत्ताज्ञानस्य च विशेषकत्वेपगमे तु तत्सामानाधिकरण्यप्रसासन्निकल्पेपि न संभवतीत्यत्र प्रवर्तितं।
एवं चावच्छेदकावच्छेदेन हेतुमत्ताज्ञाने हेतुमायां तादृशविशेष्यताभिन्नत्वविशेषेण धूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टान्य
९४ त्वमेव धूमप्रकारतानिरूपितविशेष्यतायां निवेशनीयमतो नोक्तसंशयादनुमित्यापत्तिः। सामानाधिकरण्यमात्रावगाहिज्ञाने हेतु
तायां तु तादृशविशेष्यताभिन्नविशेष्यताविशिष्टान्यत्वं निवेशनीयं। अतो न पदर्शितसमूहालंबनादनुमित्यनुपपत्तिरिति। न चैवं
सौ नीलपर्वतत्वावच्छेदेन धूमाभावप्रकारकात्सामानाधिकरण्येन च धूमप्रकारकात्संशयादनुमित्यापत्तिरिति वाच्यं। धूमप्रकारता
निरूपितविशेष्यतायामपि धूमाभावप्रकारतानिरूपितत्वं किंचिद्धर्मावच्छिन्नविशेष्यताभिन्नत्वस्य निवेशात्। अनुमितौ चैवं नीलप
र्वतो वह्निव्याप्यवान्निसाकारकपरामर्शादनुमित्यनुदयप्रसंगः निवात्ताता दृशपरामर्शान्नीलपर्वतो वह्निमानित्याकारकानुमिते
रेवोत्पत्तेः तादृशस्थले च नीलप्रकारतानिरूपितविशेष्यताभिन्नवह्निविषयतानिरूपितविशेष्यतावच्छेदकतासंबंधेनानुमिति
त्वावच्छिन्नं प्रति नीलप्रकारतानिरूपितविशेष्यताभिन्नवह्निव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदकत्वसंबंधेन सा परामर्शस्य २१
हेतुत्वांतरस्यावश्यकत्वात्तत्र वह्निव्याप्यधूमप्रकारताभिन्नायाः नीलत्वावच्छिन्नप्रकारतानिरूपितकिंचिद्धर्मावच्छिन्नवि धर्मि

शेष्यताभिन्नत्वे सत्त्वैव विशेष्यतायां निवेशनीयतयाऽनुपपत्त्यभावात् नीलपर्वतो वह्निमानित्येतादृशस्थले हेतुत्वान्तरवच्छेदकतापाः आवश्यकत्वं नील
वह्निव्याप्यवान् सर्वतो वह्निव्याप्यवानित्यादिसमूहालंबनानन्तरं नीलपर्वतो वह्निमानित्येतादृशानुमितेस्सर्वानिवारणाय [illegible]नु विशेषतावच्छेदकत्व
प्रसासज्जिकत्वेतादृशसमूहालंबनोत्तरं नीलपर्वतो वह्निमानित्येतादृशानुमित्यापत्तिर्न संभवति। अवच्छेदकतापर्याप्त्या अपसंबंधेनानुमितित्वं
नितादृशसंबंधेन परामर्शस्य हेतुत्वात्तादृशसमूहालंबनज्ञानीयविशेष्यतावच्छेदकतायाविशिष्टपर्याप्त्यभावान्नतु मानुमितिविशेष्य
तापवच्छेदकतापाः विशिष्टपर्याप्त्यसंभवादिति तु विशिष्टस्यानतिरेकेत्वादृशमात्रे। यथावच्छेदकतापर्याप्त्यवच्छेदकता संबंधेनानुमिते
प्रतितादृशसंबंधेनैव परामर्शस्य हेतुता। नीलपर्वतो वह्निमानित्यादौ नीलपर्वतत्वोभयत्वावच्छेदेन विशेष्यतायाः पर्याप्तिरिति तादृश
संबंधेन तथाविधानुमितिस्तादृशोभयत्वएवोभयत्वेन तथा च नत्रनसंभवतीति तादृशोभयत्वस्य तथाविधपरामर्शीयविशेष्यतावच्छे
दकतापर्याप्त्यनवच्छेदकत्वादिति। वेदत्व स्वत्व मोपानतः। एवमपि पर्वतत्वविशिष्टनीलत्वावच्छिन्नविशेष्यकपरामर्शात्तादृशानुमि
त्यापत्तिर्दुर्वारैव। तादृशपरामर्शीयविशेष्यतावच्छेदकतापाः उभयत्वावच्छेदेनैव पर्याप्तत्वात्। वस्तुतस्तु अवच्छेदकतापाः व्यासज्य
वृत्तित्वस्य निरस्तत्वात् नीलपर्वतो वह्निमानित्यादिज्ञानविशेष्यतावच्छेदकतापा अपि प्रत्येकमेव पर्याप्तत्वेन तादृशाप्रकारो संताः सं
भवतु किंरूपेव सत्त्वम् सद्भूहेतो। स्वावच्छेदकावच्छिन्नत्वसंबंधेन तत्तद्वच्छिन्नत्वं निरवच्छिन्नत्वं चाह्यं। अतो नद्ज्ञातिमान्धूमाभाववान्पर्वतो धू

मित्सनु

मवान्निश्चितत्वादनुपपत्तिः। न चैवं ज्ञानिमान्वह्निव्याप्यवान्वा इत्याकारकपरामर्शादनुमित्सोपपत्तिरिति वाच्यं ज्ञानिमान्वह्निव्याप्यवानित्यादिनि
र्णया सर्वत्रो वह्निमानित्याद्यनुमितिवारणाय पुनिरवच्छिन्नविशेष्यतावच्छेदकतासंबंधेन अनुमितिं प्रति तादृशावच्छेदकतासंबंधेन परा
मर्शस्य हेतुतायाः कल्पनात्तादृशस्थले पि ननुतवत्तादृशानुमित्सापत्तिपवारणसंभवात् ज्ञानिमान्वह्निव्याप्यवानित्यादेस्तु समानविष्य
१२ तावच्छेदकत्वमस्मात्सत्ताकार्यकारणभावांतरकल्पनात् ज्ञानिमान्वह्निव्याप्यवानित्यादिनिर्णयकाले ज्ञानिमान्वह्निमानित्याद्यनु
मित्सनुदयप्रसंगः स्यादिति। अन्नच ज्ञानत्वव्यक्तिभेदेन विषयतानां भेदानभ्युपगमेनिर्णयात्मकज्ञानीयविशेष्यतायाः अपि ननुतादृशाभि
यसंबंधेन विशेष्यतायाविशेष्यत्वात्तमित्सनुपपत्तिरशक्यसमाधानैवेति चेद्भूपुनरत्रानिरूहस्यार्थमवधेयं। विशेष्यतावच्छेदकतासंबंध
न अनुमितिं प्रति स्वीयवह्निव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्य निष्ठभेदप्रतियोगितानिरूपितस्वावच्छिन्नविशेष्यतानिरूपित
धूमाभावप्रकारताकत्वसंबंधावच्छिन्नावच्छेदकतोभयसंबंधेन परामर्शो हेतुः। वह्निव्याप्यधूमवन्त्वा महानसं वह्निव्याप्यधूमवान्
पर्वत इत्यादिपरामर्शीयस्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकारताकत्वसंबंधेन पर्वतत्वाभाववत्त्वेन तादृशसंबंधावच्छिन्नपर्वत
त्वनिष्ठप्रतियोगितावच्छेदकतारूभेदवत्ताहस्वनिष्ठभेदप्रतियोगितानिरूपिततादृशसंबंधावच्छिन्नावच्छेदकत्वघटितोभय १९
संबंधेनासो पर्वतत्वेवर्तते अतो न तदुत्तरं पर्वतो वह्निमानित्याकारकानुमित्सप्रसंगः। एवं तत्स्वावच्छिन्नविषयतानिरूपितधू धर्मि

माभावप्रकारतानिरूपितत्वसंबंधेन महानसत्वविशिष्टस्यास्तादृशोभयसंबंधेन यस्सो महानसत्ववान्न इति न तस्मान्महानसं वह्निमदित्या
कारकानुमित्यापत्तिः प्रतियोगितावच्छेदकत्वं निरवच्छिन्नं ग्राह्यं तेन पर्वतो वह्निव्याप्यधूमवान्न वा इत्यादिनिखिलसंदेहानामेव तादृश
संबंधेन पर्वतत्वमहानसत्वोभयाद्यवच्छिन्नत्वेपि न क्षतिः तादृशभेदप्रतियोगितावच्छेदकतायाः उभयाद्यवच्छिन्नत्वात् न च यादृशधर्मे
विशेषधर्मितावच्छेदकीकृत्य कदाचिदपि धूमाभाववत्ताज्ञानं न जातं तादृशधर्मनिष्ठनिरूपकसंबंधावच्छिन्नप्रतियोगिताकभेदाप्रसिद्ध्या
न तत्तादृशोभयसंबंधेन परामर्शाभावान्न तद्धर्मावच्छिन्नविशेष्यताकानुमितिप्रसंग इति वाच्यं तादृशानुमित्यनुरोधेन स्वावच्छेदकावच्छि
न्नत्वसंबंधेन धूमाभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यविशेष्यतावच्छेदकत्वप्रसास्यसत्त्वापरामर्शेपि हेतुत्वान्तरकल्पनादिति॥
अथ विशेष्यतावच्छेदकताप्रत्यासत्तिकल्पे हेतुतावच्छेदकीभूतधूमत्वालोकत्वादीनां विशिष्यनिवेशस्यावश्यकतया तद्भेदेन कारणताव
कुल्यं तथाहि धूमत्वालोकत्वादीनां विशिष्यनिवेशसावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वसंबंधेन किंचिद्धर्मावच्छिन्न
प्रतियोगिताकव्याप्याभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदकताप्रत्यासत्त्या ज्ञान
भेदेन विवक्षिताभ्युपगमे स्वीयव्याप्यप्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्वविषयभेदप्रतियोगितानिरूपितस्वावच्छिन्नवि
तु

शेष्यतानिरूपितं किंचिद्धर्मावच्छिन्नप्रतियोगिताकव्याप्याभावप्रकारताकत्वसंबंधावच्छिन्नावच्छेदकत्वोभयसंबंधेन परामर्शस्य हेतुतावाच्या। तथा
च वह्निव्याप्यालोकाभाववान् वह्निव्याप्यधूमवांश्च पर्वत इत्याद्याकारकज्ञानादनुमित्यनुदयप्रसंग इति धूमत्वादीनां विशेष्यनिवेशनमावश्यकं।
13 सामानाधिकरण्यप्रत्यासत्त्या निवेशे तु न हेतुतावच्छेदकताभेदेन कारणताबाहुल्यं। विशिष्य हेतुतावच्छेदकमनिवेश्यैव च निरूपितत्वप्रति
योगितासंबंधावच्छिन्नप्रकारतावच्छेदकत्वावच्छिन्नत्वस्य निरूपकत्वेन निरूपितत्वोभयसंबंधेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपिताभा
वप्रकारताविशिष्टान्यायाः पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितव्याप्यप्रकारतानिष्ठालोकाद्यात्मकरूपवह्निव्याप्यवत्ता निर्णयत्वेन ज्ञा
नभेदेन विषयिताभेदाभ्युपगमेनैतदनभ्युपगमेन तु स्वावच्छिन्नप्रतियोगिताकाभावप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकत्व
संबंधावच्छिन्नत्वस्वनिष्ठप्रतियोगितानवच्छेदकताकभेदवत्त्वस्वविशिष्टव्याप्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वोभयसंबंधे
न किंचिद्धर्मविशिष्टज्ञानत्वरूपव्याप्यवत्तानिर्णयत्वेन पर्वतत्वावच्छिन्नविशेष्यताकवह्न्यनुमितित्वावच्छिन्नं प्रति हेतुत्वसंभवात्॥
एवं च हेतुतावच्छेदकविशेष्यतावच्छेदकयोः न्यूनाधिकभावस्यासार्वत्रिकत्वात् परिच्छेदत्वादविशेष्यतावच्छेदकतानिवेशप्रत्यासत्तिकल्पनाप्र
यवानवकाशादिति च हेतुमेव। हेतुतावच्छेदकभेदेन परामर्शस्य हेतुत्वकल्पनमेवोचितं॥ अन्यथा वह्निव्याप्यधूमाभाववान् वह्निमान् प १३
र्वत इत्यादावापत्तिः प्रतिबंधकाभावव्यतिरेकनिरूपितविधया वह्निव्याप्यधूमवान् पर्वत इत्यादिनिरूपितानां हेतुतांतरकल्पनेन गौरवात्॥ अन्ये धार्मि

नेनुमनुमितिज्ञाने वह्निव्याप्यधूमवत्तादिना हेतुत्वकल्पने विषयमानिवेशप्रनादग्रापसनुमितिसाधारणवह्निव्याप्यधूममादिमनानिर्णयाविशि
ष्टत्वस्यैवऽन्यतावच्छेदकत्वोपगमात् । एवं नादृशकार्यकारणभावे नैवोपपत्तेरतिरिक्तकारतायास्तत्राकल्पनात् । अथ वा एतन्मते पि हेतु
तावच्छेदकमनिवेश्यैव स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वस्वनिरूपिताभावविषयतानिरूपितासतियोगितासंसर्ग
वह्नित्वप्रकारतावच्छेदकावच्छिन्नत्वसंप्रकारतानिरूपितत्वेनात्रितयसंबंधेन विशिष्टविशिष्याया विशेष्यतात्वन्यवह्निव्याप्यप्रकारता
निरूपितविशेष्यतावच्छेदकत्वमसो सत्याज्ञानत्वेन हेतुता कल्प्यते प्रथमदलप्रवेशाद्धूमाभाववत्ताहानत्वं वह्निव्याप्यधूमवान्पर्वत
इत्सेनादृशज्ञानीयपर्वतविशेष्यतायाः व्यासंग्रहः द्वितीयदलप्रवेशात् त्रिखिलकाशकीनीयपर्वतादिविशेष्यतायास्तदघटितसंबंधेन ज्ञा
नानरीयधूमाभावादिनिरूपितपर्वतादिविशेष्यताविशिष्टत्वेपि नक्षतिः तृतीयदलप्रवेशात्तदालोकाभाववान् वह्निव्याप्यधूमवांश्च प
र्वत इत्याकारकसमूहालम्बनीयधूमप्रकारतानिरूपितपर्वतविशेष्यतायाः स्वावच्छेदकावच्छिन्नत्वस्वनिरूपितज्ञाननिरूपितत्वसं
बंधेनालोकाभावप्रकारतानिरूपितविशेष्यताविशिष्टत्वेपि न क्षतिः । तादृशविशेष्यतायां आलोकाभावप्रकारतानिरूपितवि
शेष्यताभावविषयतानिरूपितप्रतियोगिप्रकारतावच्छेदकालोकत्वावच्छिन्नप्रकारतानिरूपितत्वाभावेन तादृशत्रितयसं
बंधेन ध्यालोकाभावप्रकारतानिरूपितविशेष्यतावैशिष्ट्याभावात् । ज्ञानभेदेन विषयिताभेदे तु स्वीयविशेष्यतावैशिष्ट्याया

१५ स्वीयवह्निव्याप्यप्रकारतानिरूपितविशेष्यतानात्त्वच्छेदकत्वमेव परामर्शस्य प्रसाध्यनि।। विशेष्यताभावस्य स्वावच्छेदकावच्छेदात्तत्त्वनिरूपित
भावविशिष्टपितानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितत्वोभयसंबंधावच्छिन्नप्रतियोगि
ताकोग्राह्यः (वह्निव्याप्यधूमाभाववन्महानसं वह्निव्याप्यधूमवत्पर्वतन्न दृसेत्तादृशज्ञानीयपर्वतविशेष्यतायां तदीयमहानसविशेष
तायाः स्वावच्छेदकावच्छेदकत्वासंभवात् ह्र। वह्निव्याप्यालोकाभाववान् वह्निव्याप्यधूमवांश्च पर्वतन्न दृसेत्तादृशज्ञानीयपर्वतविशेष्यतायां त
दीयालोकाभावप्रकारतानिरूपितविपर्वतविशेष्यतायाश्च स्वमद्दत्वासत्वात् ह्र। तादृशोभयसंबंधावच्छिन्नप्रतियोगिताकस्वीय
विशेष्यताभावविशिष्टत्वमसत्वमेवासर्वासां वह्निव्याप्यधूमवान् पर्वतन्न दृसाद्याकारकज्ञानीयधूमप्रकारतानिरूपितविशेष्य
तायां तादृशज्ञानीयविशेष्यतायाः तादृशा। निश्चयात्मक। संबंधावच्छिन्नाभावोप्यधिकरणसंबंधावच्छिन्नाभावश्च वेस्तपीय॥
नचात्रस्वघटितविशेष्यतात्वावच्छिन्नप्रतियोगिताकाभावो निवेशयितुमशक्यः। वह्निव्याप्यधूमवान्न पर्वतन्न दृसादिनिश्चयविशेष्यता
यां संशयात्मकज्ञानीयविशेष्यतायास्तादृशसंबंधेन सत्वाद्विशेष्यतात्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकस्वविशेष्यता
भावासत्वात् तत्र ज्ञानीयविशेष्यतात्वावच्छिन्नाभावत्वेन तादृशाभावे निवेशयन तज्ज्ञानहेतुत्वे चाननुगम इति विशेष १४
ताप्रतियोगितीकाभावत्वेनैव तादृशाभावाः निवेशनीयाः इत्थं च संशयात्मकज्ञानीयविशेष्यतायामपि तादृशज्ञानीया धर्मि

भावप्रकारतानिरूपितविशेष्यतायाः हि तादृशानादृशोभयसंबंधावच्छिन्नाभावसत्त्वादतिप्रसंग इति वाच्यं। निरूपितत्वसंबंधावच्छिन्नस्वनिष्ठा
वच्छेदकतानिरूपकीभूतविशेष्यतावृत्तिप्रतियोगिताकाभावत्वेन तादृशाभावानां निवेशात्। उभयत्वाद्यवच्छिन्नाभावप्रतियोगिता
यां च निरूपितत्वसंबंधेन स्वस्यानवच्छेदकतया तादृशाभावप्रतियोगितायाश्च निरूपितत्वसंबंधेन स्वस्यानवच्छेदकतया तादृशा
भावभावमादायातिप्रसंगाभावात्। अथैवमपि ज्ञानीयपूर्वक्षणवृत्तित्वविशिष्टविशेष्यत्वाभावमादायातिप्रसंगो दुर्वारः।।
त्वादृशप्रतियोगितायां ज्ञानस्यानवच्छेदकत्वात्। न चैवं घटकपाः अव्यासज्यवृत्तितया तत्र तादृशज्ञानस्य प्रतियोगितावच्छेदक
त्वं न संभवति। किंतु पूर्वक्षणवृत्तित्वनिष्ठावच्छेदकतायामेव निरूपितत्वघटितसामानाधिकरण्यसंबंधेनावच्छेदकत्वं तस्येति
त्वदोष इति वाच्यं। पूर्वक्षणवृत्तित्वनिष्ठावच्छेदकतायां तादृशसंबंधेन तज्ज्ञानमवच्छेदकं ज्ञाननिष्ठप्रतियोगितावच्छेदक
तायाः पूर्वक्षणवृत्तित्वमवच्छेदकमित्यत्र विनिगमनाविरहेण तज्ज्ञानस्यापि तत्रावच्छेदकत्वादिति चेन्न। स्वनिष्ठावच्छेदकता
यां किंचिदवच्छिन्नावच्छेदकतानिरूपितत्वस्यानिवेशात्। न ज्ञाननिष्ठायास्तादृशाभावप्रतियोगितावच्छेदकतायाः पूर्वक्षण
वृत्तित्वाद्यवच्छिन्नावच्छेदकत्वनिरूपकत्वेन तादृशाभावमादायातिप्रसंगाभावादिति कृतं पल्लवितेन।। अथ विशेष्यतावच्छे
दकताप्रयासः स्वपरामर्शस्य हेतुतापगमेऽन्यलिंगानुमितौ हेतुतावच्छेदकमनिवेश्य धूमालोकादिलिंगकपरामर्शानंतर

कत्वेपूर्णहेतुत्वेपि अन्यसंबंधघटितव्यापकत्वावगाहिपरामर्शजन्यानुमितौ व्यभिचारो दुर्वारः। तथाहि तन्मते विशेष्यतावच्छेदकम निवेशे संयोग
संसर्गकवह्निव्याप्यधूमवत्ताज्ञानोत्तरवह्निविधेयकानुमितित्वादिकमेव धूमादिपरामर्शजन्यतावच्छेदकं वाच्यं। तथा च महानसत्वाद्यवच्छि
न्नविशेष्यकसंयोगसंबंधावगाहिधूमादिमत्ताज्ञानोत्तरोत्पन्नायाः वह्निव्याप्यरूपविशेषवान् पर्वत इत्येतादृशपरामर्शजन्यपर्वतत्वाद्यव
15 च्छिन्नविशेष्यकानुमितेरपि संयोगसंबंधावगाहिवह्निव्याप्य समवायसंबंधावगाहि व्याप्यधूमवत्ताज्ञानाव्यवहितोत्तरोत्पत्तिकानुमिति
त्वरूपतादृशपरामर्शजन्यतावच्छेदकाक्रान्ततया विशेष्यतावच्छेदकत्वप्रत्यासत्त्यानधिकरणीभूते पर्वतत्वे च धूमप्रकारतानि
रूपितविशेष्यतावच्छेदकत्वरूपप्रकारतानवच्छेदकप्रत्यासंयोगसंबंधावगाहिधूमप्रकारतारूपकारणतासत्त्वेन व्यभिचारः। न च भव
न्मते पुरुषान्तरीयतत्संसर्गकपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिकान्यसंसर्गकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्वसा
मानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन तत्संबंधावगाहिधूमपरामर्शादिमत्त्वनिवेशेन वदेत्तन्मतेपि स्वीयसं
योगसंबंधावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नत्वविशेष्यताकत्वस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभय २५
संबंधेन तज्ज्ञानविशिष्टत्वं कार्यतावच्छेदककोटौ निवेश्य अन्यधर्मावच्छिन्नविशेष्यकसंयोगसंबंधावगाहिधूमादिपरामर्शाव्य धर्मि

वह्नितोऽन्तरीयत्वग्रपर्वतत्वाद्यवच्छिन्नपक्षकान्यसंसर्गकानुमितौ व्यभिचारे वारणीय इति वाच्यं । एवमपि वह्निव्याप्यधूमवन्महानसं वह्निव्याप्या

लोकवान्पर्वतश्च इत्यादिसमूहालंबनजन्यायां महानससंवह्निमत्पर्वतो वह्निमानित्येतादृशसमूहालंबनानुमितेरूपदर्शितोभयसंबंधेनता

दृशधूमज्ञानविशिष्टायाः विशेष्यतावच्छेदकतया पर्वतत्वे सत्त्वेन तत्र धूमप्रकारतानिरूपितविशेष्यतावच्छेदकतया परामर्श

सत्वेन व्यभिचारस्य दुर्वारत्वात् । अत्र केचित् । स्वनिरूपकज्ञानीयवह्नितोऽन्तरक्षणोत्पन्नानुमितिनिरूपितत्वस्वावच्छेदकावच्छिन्न

त्वोभयसंबंधेन संयोगसंबंधावच्छिन्नवह्निव्याप्यधूमादिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यतानिरूपिताभेवच्छेदकत्वं कार्य

तावच्छेदकम् असामञ्जस्यात् । तादृशसमूहालंबनानुमितिनिरूपिताविशेष्यतायां च तादृशसंयोगसंबंधावच्छिन्नप्रकारतानिरूपितविशे

ष्यतानिरूपकपरामर्शीयवह्नितोऽन्तरक्षणोत्पत्तिकानुमितिनिरूपिता न तादृशविशेष्यतावच्छेदकावच्छिन्ना अतो नोपदर्शिता

भयसंबंधेन तादृशविशेष्यताविशिष्टत्वं । अपि तु महानसत्वावच्छिन्नविशेष्यतैव तथेति नानुपपत्तिः । तादृशानुमितिनिरूपितप

र्वतत्वावच्छिन्नविशेष्यतायाः अपि स्वावच्छेदकावच्छिन्नत्वसंबंधेन समयान्तरीयपर्वतत्वावच्छिन्नविशेष्यकधूमपरामर्शनिरूपितत्वा दृश

विशेष्यताविशिष्टत्वान्न प्रथमदलप्रवेशः । तादृशसमूहालंबनात्मकपरामर्शीयमहानसत्वावच्छिन्नविशेष्यतायाः स्वनिरूपक

ज्ञानाव्यवहितोत्तरक्षणे तत्रानुमितिनिरूपितत्वसंबंधेन वैशिष्ट्यस्य तादृशसमूहालंबनानुमितिनिरूपितपर्वतत्वावच्छिन्नविशेष्यतायां सत्वाद्गुर
मदत्वप्रवेशाद्दृष्टान्तः। अत्र च ज्ञानभेदेन विषयताभेदोपगमपक्षानुसारः। अन्यथा ज्ञानादृशानुमितिनिरूपितपर्वतत्वावच्छिन्नविशेष्यतायास्तथा
विधोभयसंबंधेन संयोगसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यताविशिष्टायाः पर्वतत्वावच्छिन्नपक्षकधूमलिंगकपरामर्शजन्यानुमिति
विशेष्यतानतद्भिन्नत्वेन व्यभिचारस्य वारयितुमवश्यवाच्यत्वात्॥ अन्ये तु॥ समवायश्च सासानिकव्यापकसमवायसंबंधघटितसामानाधिकरण्य
16 स्याव्यवहितोत्तरक्षणोत्पन्नत्वोभयसंबंधेन परामर्शविशिष्टत्ववदन्यत्वे सति संयोगसंबंधावच्छिन्नधूमादिप्रकारतानिरूपितविशेष्यताव
च्छेदकत्वं वह्निविधेयतानिरूपितविशेष्यतावच्छेदकत्वघटितसामानाधिकरण्यस्याव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन परा
मर्शवत्त्वमेव धूमपरामर्शजन्यतावच्छेदककोटौ निवेश्यते। एवं च वह्निव्याप्यधूमवान्महानसं वह्निव्याप्यालोकवान्पर्वत इत्यादृशसमूहा
लंबनजन्यायाः पर्वतत्वमहानसत्वोभयावच्छिन्नपक्षकानुमितेस्तादृशोभयसंबंधेन धूमपरामर्शविशिष्टत्वेऽपि तादृशविशिष्टनिरूपि
ताधिकरणत्वं न पर्वतत्वस्य सामानाधिकरण्यसंबंधेन वह्निविशिष्टपराधिकरणतायाः सामानाधिकरण्यघटितशरीरे विशेषणस्य तादृशसंबंधः
प्रविष्टत्वेन संबंधेन यद्विशेषणाधिकरणत्वं तन्निष्ठप्रतियोगिताकत्वस्य वक्तव्यत्वात्तादृशसामानाधिकरण्यघटकीभूतधूमप्रकारतानिरूपितवि २५
शेष्यतावच्छेदकत्वरूपविशेषसंबंधेन विशेषणीभूतधूमपरामर्शानधिकरणत्वात्। अतः पर्वतत्वे धूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासं धर्मि

वंधेन परामर्शस्यापि न व्यभिचारः। कार्यतावच्छेदकविशिष्टाधिकरणत्वसमभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपनियतत्वघटितव्यापक
तायाएव कारणतायामनिवेशनेन कारणतावच्छेदकनिष्ठस्य तादृशाभावप्रतियोगितावच्छेदकत्वस्यैव व्यभिचारत्वाहानस्य च प्रकृते
सत्वादित्याहुः। स्वाव्यवहितपूर्ववृत्तिज्ञानीयधूमप्रकारतानिरूपितविशेष्यतावच्छेदकत्वस्यैव स्वीयविधेयतानिरूपितविशेष्य
तावच्छेदकत्वोभयसंबंधेनानुमितित्वावच्छिन्नं प्रतिसंयोगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारतानि। वह्नि। रूपितविशेष्यतावच्छेद
कतासंबंधेन परामर्शत्वेन हेतुताया उपदर्शितसमूहालंबनानुमितिश्च वह्निविधेयतानिरूपितविशेष्यतावच्छेदकत्वमात्रेणापर्व
तेन तादृशोभयसंबंधेन तत्र तदनुमितेः स्वाव्यवहितपूर्ववृत्तिज्ञानीयधूमप्रकारतानिरूपितविशेष्यतावच्छेदकताभावात्। अतः पर्वत
त्वधूमप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन परामर्शस्य त्वेपि न व्यभिचार इत्येवं पुनरस्माकीनः पंथाः। स्यादेतत्। पक्ष
तावच्छेदकभेदेन नानाविधाप्रामाण्यशंकाभावानां पृथक् पृथक् निवेशानुरोधाद्वह्निदर्शनपरामर्शहेतुताभेदस्यावश्यकः। अन्य
थाऽदं ज्ञानं धूमाभाववति पर्वते धूमप्रकारकं इदं ज्ञानं धूमाभाववति महानसे धूमप्रकारकमित्याकारकनिखिलाप्रामाण्यग्रहा
नानां अभावस्यैकत्र निवेशप्रसंगेन इदं ज्ञानं धूमाभाववति महानसे धूमप्रकारकमित्याकारकाप्रामाण्यग्रहदशायां पर्व

तत्ताद्यवच्छिन्नविशेष्यकधूमपरामर्शेन तथाविधानुमितिस्तु दयापत्तिः। न च पर्वतत्वाद्यवच्छिन्नपक्षकधूमादिपरामर्शानन्तरं धूमाभाववति धूमप्रका
रकमितिसामग्र्याकारकाप्रामाण्यज्ञानमेव नोत्पद्यते तादृशाप्रामाण्यग्रहाश्च पर्वतत्वादिविशिष्टधूमाद्यभावावगाहितया तत्र बाधबुद्ध्या
तादृशपरामर्शांशप्रतिबन्धकत्वादिति तादृशाभावांशेऽनवच्छेदककोटौ निविष्टएव नास्तीति वाच्यं पर्वतत्वादिसामानाधिकरण्ये
न धूमाद्यभावावगाहितया तादृशाप्रामाण्यग्रहस्योत्पादे बाधकाभावात्। अथ वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शदशायां तज्ज्ञानीय
धूमप्रकारतात्वसामानाधिकरण्येन धूमाभाववन्महानसविशेष्यतानिरूपितत्वावगाहिभ्रमत्वग्रहसत्त्वे पर्वतत्वावच्छिन्नविशे
ष्यकानुमितिस्स्यादेवापादयसिद्धिर्वा तादृशप्रकारतात्वावच्छेदेन तादृशविशेष्यतानिरूपितत्वावगाहिभ्रमत्वग्रहसत्त्वे तत्र नाद्यपक्षः।
वह्निव्याप्यधूमवन्महानसमित्येतादृशपरामर्शदशायां तज्ज्ञानीयधूमप्रकारतात्वसामानाधिकरण्येन धूमाभाववन्महानसविशेष्य
तानिरूपितत्वावगाहिभ्रमत्वग्रहसत्त्वेपि महानसत्वावच्छिन्नविशेष्यकानुमितिस्स्यात् विशेष्यतावच्छेदकावच्छेदेन तादृशविशेष्यता
निरूपितप्रकारकग्रहस्यैवाभावनिवेशात् नाप्यन्त्यः। न ज्ञानीयधूमप्रकारतात्वावच्छेदेन महानसत्वाद्यमिश्रेन धूमाभाववद्विशेष्य
तानिरूपितत्वप्रकारताग्रहदशायामिव धूमाभाववन्महानसविशेष्यतानिरूपितत्वग्रहदशायामपि पर्वतो वह्निमानित्येतादृशानु २७

धर्मि

मितस्तूदयस्येष्टत्वात्। तथाहि। ज्ञानतावच्छेदकीभूतप्रकारतायां तत्प्रकाराभाववद्विशेष्यतानिरूपितत्वग्रहस्य सत्त्व एवानुमितेर्नोत्पद्यत ए
वं सत्तु भवतीष्टा। नाहत्वाविशेष्यतानिरूपितत्वभानं च। तथाविधाभाववतिमहानससाधारणस्याभावस्य भाने पक्षतामिति चेत्। सत्यमे
तत्स्यैवमपि विशेष्यता। वच्छेदकतात्रासत्तिनस्येष्टं धूमाभाववतिधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वधूमाभाववद्वृत्ति
धूमप्रकारतानिरूपितमहानसत्वावच्छिन्नविशेष्यताकत्वरूपनानाविधाप्रामाण्यग्रहाभावानां पक्षतानिवेशनीयतया वह्निव्या
प्यधूमवान्पर्वतः वह्निव्याप्यधूमवन्महानसं इत्याकारकसमूहालंबनपरामर्शे धूमाभाववद्वृत्तिधूमप्रकारतानिरूपितमहानसत्वा
वच्छिन्नविशेष्यताकत्वादिरूपाप्रामाण्यग्रहसत्त्वे पर्वतो वह्निमानित्याद्याकारकानुमितेरनुपपत्तिः। तत्रानाहार्यानुमितिः स्वानु
भवसिद्धैव न। पक्षतद्धर्मावच्छिन्नविशेष्यतायां प्रकाराभावेव। इति चेत्। अन्यधर्मावच्छिन्नविशेष्यकानुमितिरपि नो सद्यतेद्र
निकश्चिदस्तु पैति। अत्र केचित्तु। अप्रामाण्यग्रहाभावस्य परामर्शप्रयोजकतायां अवच्छेदकत्वोपगमप्रचारोपानदेवनावि
नुपर्वतत्वावच्छिन्नविशेष्यकधूमलिंगकवह्न्यनुमितिं प्रति धूमाभाववद्वृत्तिधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यता
कत्वप्रकारकग्रहत्वावच्छिन्नाभावत्वेन तत्स्यपृथगेव हेतुत्वमुपेयते। न चाप्रामाण्यग्रहाभावस्य पक्षताघटकत्वाभेदे न हेतुत्वस्य

परामर्शस्य च पुरुषभेदेन कारणान्तरस्य कल्पनापेक्षया पक्षतावच्छेदकभेदेनाप्रामाण्यग्रहाभावविशिष्टपरामर्शस्यैव हेतुत्वं कल्पनमुचितमि
ति वाच्यं तथा सति नयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण पक्षतावच्छेदकसमसंख्यकार्यकारणभावानां द्वैगुण्यप्रसंगात्। पक्षता
वच्छेदकभेदेनाप्रामाण्यग्रहाभावानां पुरुषभेदेन च परामर्शानां हेतुत्वकल्पनायाश्चाविनिगमनादित्याकुः। परंतु स्वीयधूमाभाववद्वृत्तित्व
प्रकारतानिरूपितायां धूमप्रकारतानिरूपितविशेष्यत्वनिष्ठविशेष्यतानिरूपितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्व
18 संबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टपरामर्शत्वेन हेतुताकल्पनान्नानुपपत्तिः। धूमप्रकारतानिरूपितमहानसत्वाव
च्छिन्नविशेष्यतायां धूमाभाववद्वृत्तित्वग्रहदशायामपि तादृशसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टपरामर्शस्य पर्वत
त्वे सत्त्वात्। अभाववैशिष्ट्यं च परामर्शविशेषणताविशेषविशेष्यतावच्छेदकत्वघटितसामानाधिकरण्यसंबंधेन। अथैवं धूमप्रकारतानिरू
पितपर्वतत्वावच्छिन्नविशेष्यतात्वावच्छेदेन धूमाभाववद्वृत्तित्वग्रहदशायामपि पर्वतो वह्निव्याप्यधूमवान्महानसं च वह्निव्याप्यधूमवदित्याका
रकसमूहालंबनपरामर्शात्पर्वतो वह्निमानित्यस्य तादृशानुमित्यापत्तिः महानसत्वांशे भावेन तादृशसामानाधिकरण्यसंबंधेनाप्रामाण्यग्र
हाभावविशिष्टस्य परामर्शस्य विशेष्यतावच्छेदकतासंबंधेन पर्वतत्वे सत्त्वादिति चेन्न। तादृशपरामर्शस्य महानसत्वनिष्ठभावेनाप्रा १८
माण्यग्रहाभावविशिष्टत्वेपि न तद्विशिष्टपरामर्शनिरूपितमधिकरणत्वं पर्वतत्वस्य। सामानाधिकरण्यनिरूपिताधिकरणत्वस्य धर्मि

वसामानाधिकरण्यसंबंधेनैकविशिष्यपराधिकरणताह्रडत्वं चकारतावच्छेदकविशिष्टनिरूपिताधिकरणताया उक्तार्थत्वादप्रयोजकत्वात्
धूमेपर्वतत्वेनविशिष्यतावच्छेदकासत्त्वेनानुमित्यापत्तिः प्रस्तुतानादृशसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभाववद्विशेषविशेष्यतावच्छे
दकत्वमेवधकारणताघटकसंबंधः उपदर्शितस्थले च पर्वतनिष्ठविशेष्यतावच्छेदकतायाः सामानाधिकरण्यसंबंधेन तादृशप्रामाण्यग्र
हाभाववद्विशिष्टतया नोपदर्शितकारणताघटकसंबंधेन पर्वते धूमपरामर्शोऽस्तीति नापत्तिरिति संक्षेपः। एतेषु च कल्पेषु परामर्शस्य हेतुतावच्छेद
कभेदेन हेतुताभेदः प्रावृक्ष्यकरुतिष्टयोन दसहिष्णुतायां पुनरेतदवधेयं। ज्ञानीयविशेष्यताहृतविशेष्यत्वाभाववद्विशिष्टायाव्याप्यप्र
कारतानिरूपितविशेष्यतानतदवच्छेदकत्वप्रसासत्त्वापरामर्शे हेतुः। विशेष्यत्वाभावश्च स्वनिरूपितावच्छिन्नत्वं। स्वावच्छेदकतावच्छेदक
धर्मावच्छिन्नत्वस्वनिरूपितनिरूपितत्वतदुभयसंबंधावच्छेदकतानिरूपितप्रकारतात्वावच्छिन्नावच्छेदकतानिरूपितत्वसंबंधावच्छिन्नावच्छेदकता
वच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितत्वस्वनिरूपिताधेयत्वप्रकारतानिरूपिताधिकरणप्रकारतानिरूपिताभावप्रकारतानिरूपितप्र
तियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितत्वे वह्निनयसंबंधेवच्छिन्नप्रतियोगिताकोपाद्यस्य तद्विशिष्टं
चविशेषणताविशेषेण। वह्निव्याप्यधूमवान्पर्वत इत्यसतादृशपरामर्शे दृश्यमाणे धूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतात्वावच्छेदेन
धूमाभाववद्वृत्तित्वान सहसत्त्वेनादृशपरामर्शीयधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायां न तादृशविशेष्यत्वाभाववैशिष्ट्यं।

तदानीमुपदर्शितत्रितयसंबंधेन तादृशप्रामाण्यस्यापि विशेष्यतायाः धूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायां सत्त्वात् प्रति-
योगितावच्छेदकसंबंधमध्ये प्रथमदलाप्रवेशे धूमप्रकारतानिरूपितमहानसत्वावच्छिन्नविशेष्यतात्वावच्छेदेन धूमाभाववद्वृत्तित्वग्रहदशा-
यामपि तादृशाप्रामाण्यीयधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायां तादृशप्रामाण्यज्ञानीयमहानसत्वावच्छिन्नविशेष्यतावृत्तिवि-
19 शेष्यतायाश्चरमसंबंधद्वयेन सत्त्वात् पर्वतो वह्निमानित्यनुमित्युदयापत्तिः रतः प्रथमदलप्रवेशः। न च विशेषणताविशेषेणोपप-
न्नोपगुरुत्वात् प्रथमदलप्रवेशो निरर्थकः उपदर्शितप्रामाण्यज्ञानीयमहानसत्वावच्छिन्नविशेष्यतावृत्तिविशेष्यताया विशेषणताविशेष-
ण महानसत्वावच्छिन्नविशेष्यतायामेव सत्त्वात्तादृशत्रितयसंबंधावच्छिन्नप्रतियोगिताकतदभावस्य पर्वतत्वावच्छिन्नविशेष्यतायां सत्त्वा-
दिति वाच्यं विशेषणताविशेषत्रितयसंबंधावच्छिन्नाभावनिवेशे यत्र धूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतात्वेन यत्किंचिद्विशे-
ष्यतामात्रविषयीक्रियते [घटित] रूपस्यावच्छेदकत्वावगाही अप्रामाण्यग्रहो ज्ञानसत्र पर्वतत्वावच्छिन्नविशेष्यतान्तरे विशेषणतावि-
शेषघटितसंबंधावच्छिन्नतादृशज्ञानीयविशेष्यत्वाभावसत्त्वात् पर्वतो वह्निमानित्यनाहार्यानुमित्यापत्तिः। एवं च द्वितीयदलाप्रवेशे
प्यालोकप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतात्वावच्छेदेन धूमाभाववद्वृत्तित्वावगाहिज्ञानीयपर्वतत्वावच्छिन्नविशेष्यता- १९
वृत्तिविशेष्यतायाः प्रथमचरमोभयसंबंधाभ्यां वह्निप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायां सत्त्वात्तादृशज्ञानका- धर्मि

ले वह्निव्याप्यधूमवांश्च पर्वत इत्येतादृशपरामर्शादनुमितेरनुदयापत्तिरनस्तत्रिवेशानां तृतीयदलप्रवेशे धूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नवि
शेष्यताकत्वावच्छेदेन आलोकाभाववह्निमानित्याकारकाहिकज्ञानीयपर्वतत्वावच्छिन्नविशेष्यतानिरूपितविशेष्यतायाः अपि व्याप्योभयसंबंधेन धूमप्रका
रतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायामसत्वात् तादृशज्ञानकाले तु परामर्शादनुमितेरनुदयापत्तिरनस्तत्रिवेशानां ॥ ॥ अ
न्यत्सर्वं सहनीयं सुधीभिरिति ॥ ॥ अत्र वदन्ति ॥ उपदर्शितविशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्याऽनुमितिपरामर्शयोः कार्यकारणभावः
कल्प्यः [मध्य] तेन न विधेयतावच्छेदकनिष्ठप्रत्यासत्त्या विधेयतावच्छेदकनिष्ठप्रत्यासत्तिश्च कार्यस्य पर्वतत्वाद्यवच्छिन्नविशेष्यतानि
रूपितविधेयतावच्छेदकत्वं कारणस्य च पर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमादिप्रकारतानिरूपितव्याप्तिनिष्ठावच्छेदकता
निरूपितनिरूपितत्वसंसर्गावच्छिन्नावच्छेदकतानुविशेष्यतावच्छेदकत्वे विशेष्यतावच्छेदकतात्मप्रत्यासत्तिवयोर्विशेष्यतावच्छेदकभेदेन चैतल्ल
भ्यविधेयतावच्छेदकभेदेन कार्यकारणभावभेदाभावाल्लाघवं विशेष्यतावच्छेदकविधेयतावच्छेदकयोर्भिन्नाधिकरणभावत्वास
वेदरुष्टुरिच्छेदः न च विनिगमनाविरहादुभयप्रत्यासत्त्यैव कार्यकारणभावः स्वीक्रियतदूतिवाच्यं तथा सति विशेष्यतावच्छेद
कविधेयतावच्छेदकभेदेन कार्यकारणभेदस्यावश्यकत्वेन पाल्लाघवानवकाशोनात्मनिष्ठप्रत्यासत्तेरेवोचितत्वात् ॥ न च विधेयता
वच्छेदकं विशेष्याविशेषेण विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या विशेष्यतावच्छेदकं चाविशेष्याविशेषेण विधेयतावच्छेदकनिष्ठप्रत्यासत्त्या
स्याः कार्यकारणभावः कल्प्यते उभयभेदेन कारणतावच्छेदकमितिवाच्यं तथा सति हि व्याप्यधूमवद् दृष्ट्वा मालोकवान्पर्वतः

संसर्ग वच्छेदक

इत्याकारकसमूहालंबनपरामर्शाद्व्याप्त्यंशे धर्मितावच्छेदकीकृत आलोकत्वावच्छिन्नस्य पर्वतत्वं धर्मितावच्छेदकीकृत्य स च वह्नित्वावच्छिन्नस्य तु भि
न्निप्रसंगात् द्रव्यत्वपर्वतत्वयोः प्रदर्शितविशेष्यतावच्छेदकप्रत्यासत्त्याऽऽलोकत्ववह्नित्वयोः प्रदर्शितविधेयतावच्छेदकप्रत्यासत्त्या परा म
र्शसत्वात् । तथा च प्रकृते न निष्ठप्रत्यासत्तेर्विशिष्य परिचयेऽज्ञानमात्रमुपेक्षणीयमेव वा । अथ विधेयतावच्छेदकनिष्ठप्रत्यासत्तिर्वेत्यपि
साध्यतावच्छेदकघटितव्याप्तिविषयतायाः प्रत्यासत्तिकोटौ निवेशितत्वात् साध्यतावच्छेदकस्य निविष्टत्वे किं लाघवानवकाशः । न चा
२८ नाहत्वाहेतुनिष्ठप्रकारतानिरूपितसामानाधिकरण्यनिष्ठावच्छेदकतानिरूपितनिरूपितत्वसंबंधेन वह्नित्वावच्छेदकतावच्छेदकत्वस
य साध्यतावच्छेदकनिष्ठप्रत्यासत्त्या साध्यतावच्छेदकमनिवेश्यैव हेतुत्वकल्पनं संभवति । नाहत्वावच्छेदकत्वे च हेतुसमानाधिकर
ण्याभावप्रतियोगितानवच्छेदकत्वावच्छिन्नत्वं निवेशनीयं । अतो न व्याप्तत्वात् नवमाह्निकत्वादेर्हेतुमित्साधापत्तिरिति वाच्यं । निप्रासतिहेतु
समानाधिकरण्याभावप्रतियोगितानवच्छेदकजातिमत्समानाधिकरणहेतुमानित्यादिपरामर्शाद्वह्निमानित्याद्यनुमित्यापत्तिः । न चो
पदर्शितरीत्या वह्नीनराहृत्तित्वघटितवह्नित्वत्वादिघटकीभूतभेदनिष्ठावच्छेदकतापर्यन्तं निवेशने तदवच्छेदकत्वावच्छेदकत्वप्रसा
सस्यैव हेतुत्वे कल्पनीयमिति नोपदर्शितानुपपत्तिः । हेतुसमानाधिकरण्याभावप्रतियोगितानवच्छेदकवह्नीनराहृत्तिधर्मवद्व १०
ह्निसमानाधिकरणवानित्याद्याकारकसकलवह्निहेतुनिष्ठायाः नवमाह्निको पि ज्ञानात् वह्निमानित्यनुमितिरिष्टैवेति वाच्यं । एवं सत्यपि धर्मि

हेतुतत्समानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वपक्षसमानाधिकरणत्वानिश्चयाकारकान्सामानाधिकरण्यनिरूपकतावच्छेदकमुद्र
यास्वरूपतो वह्नित्वेन वग्न्यादिविषयतामन्तर्भाव्य स्वरूपतो वह्नित्वे विधेयतावच्छेदकीकृत्यानुमित्यापत्तिः। न चेष्टापत्तिः। न च वह्नित्वं वह्न्यनिसाका
रिकाया एवानुमितेरुत्पन्नेः अन्यथा केवलं तथाविधानुमितिविरोधोपदर्शनं ग्रन्थकृतां व्यर्थं स्यादिति चेन्न। लाघवात् साध्याभाववद्वृत्तित्वनिरूपव्या
प्तिज्ञानस्यैवानुमितिहेतुत्वमुपेयते। ननु व्यापकसामानाधिकरण्यज्ञानस्याप्येवं च निरवच्छिन्नविधेयतावच्छेदकतया साध्यतावच्छेदकसाध्यानुमि
तिं प्रति पक्षविशेष्यकनिरूपितहेतुप्रकारतानिरूपितयासाध्याभाववत्तावच्छिन्नावच्छेदकत्वेनैव संसर्गीय साध्याभावनिष्ठावच्छेदकताप्रतिपत्ति
निवेश्यन तदवच्छेदकतानिरूपितनिरवच्छिन्नावच्छेदकत्वप्रत्यासत्त्यापेक्षशमर्यादस्य हेतुतावच्छेदकत्वेनैव उपदर्शितानुपपत्तिनिराकरणसं
भवात्। तथा च दुर्वारएवोपदर्शितमतविनिगमनाविरहः अत्रेदमाभाति। वह्निव्याप्यवान् इत्यादि विशिष्टाभावप्रकारकत्वरूपनिश्चयपक्षनिवेच
नानुरोधात् साध्यतावच्छेदकस्यावश्यं निवेशितव्यतया विधेयतावच्छेदकनिरूप्यसामानाधिकरण्यस्यापि वह्नित्वेन वह्निकाव्याप्य
त्वावच्छिन्नाभावप्रकारकत्वं न निवेश्यते किन्तु व्याप्यसंज्ञाप्रकारतया यादृशानुमितिवारणाय जनकतावच्छेदकप्रत्यासत्तिघटकीभूत
प्रकारतायां स्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्व उभयसंबंधेन पर्वततावच्छिन्नविशेष्यतानिरूपिताभावविषयतानिरू
पितप्रतियोगिप्रकारताविशिष्टत्वं निवेश्यमतो नानुपपत्तिरिति ध्येयम्। वह्निव्याप्तिरेव न पदार्थान्तरं प्रतियोगिप्रकारतावच्छेदकविधे

४१ यातेन रूपेण वास्तववह्निव्याप्यत्वं पक्षविशेष्यतानिरूपितप्रकारतावच्छेदकविषयताऽवगाहमाना सा संज्ञा यादृशानुमितिस्तापत्तेः। न त्र पक्षविशेष्य
तानिरूपितहेतुप्रकारतायाः तादृशप्रतियोगिप्रकारतावच्छेदकावच्छिन्नत्वविरहात् अपसत्त्वावच्छेदकावच्छिन्नत्वं स्वनिरूपकत्वं निरूपितत्व
उभयसंबंधेन पक्षविशेष्यतानिरूपिताभावविषयतानिरूपितहेतुप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितसाध्यप्रकारताविशिष्टा
व्याप्यापक्षविशेष्यतानिरूपितहेतुप्रकारतानिरूपितसाध्यप्रकारतानवच्छेदकवह्नित्वप्रसक्तसत्तापरामर्शस्य हेतुताऽत्रानुपपत्तेः। न चैवमपि
वह्निव्याप्यनीलधूमाभाववान् वह्निव्याप्यधूमवान्पर्वत इत्याकारकपरामर्शोऽनुमित्युपपत्तये अभावविशेष्यतानिरूपितहेतुप्रकारतायां व
ह्निव्याप्यवद्धूमत्वाद्यामनतिरिक्तधर्मेण वह्निप्रसंगनिवेशनीयमिति साध्यतावच्छेदकनिवेशाऽप्रावश्यकत्वमिति वाच्यं। स्वनिरूपितविशेष्यता
निरूपितत्वसंबंधेन धूमत्वाद्यप्रकारताविशिष्टं यत्न दर्शनत्वस्य तादृशहेतुप्रकारतानिरूपितव्याप्तिप्रकारतायां निवेशनेनैव उक्तज्ञानीय
तादृशव्याप्तिप्रकारतायाः उक्तसंबंधेन नीलप्रकारत्वविशिष्टत्वात् तादृशज्ञानादनुमित्युपपत्तेः। वह्निव्याप्यतावच्छिन्नाभावकोटिकसंज्ञा
यकारताया धूमत्वाद्यवृत्तित्वस्य प्रकारतायां निवेशनीयत्वेन हि। वैसतिसुहृद्धूमत्वावच्छिन्नाभावकोटिकवह्निव्याप्यधूमत्वावच्छिन्नाभावको २१
वत्वानिश्चयादनुमित्यापत्तिः। तादृशज्ञानीयसाध्यविषयतायाः उपदर्शितोभयसंबंधेनाभावप्रकारतानिरूपितहेतुप्रकारतानिरूपि
तव्याप्तिप्रकारतानिरूपितसाध्यप्रकारताविशिष्टत्वात् तादृशज्ञानीयसुहृद्धूमत्वावच्छिन्नाभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छि धर्मि

न्नविशेषणतास्य प्रकारतानवच्छेदककोटौ निवेशस्तदेव गौरवं। विशेष्यतावच्छेदकताप्रत्यासत्तिकल्पेऽस्यापि सा विशेष्यतावच्छेदकताप्रत्या-
सत्तिकल्पेस्य निरूपकनिरूपितत्वस्यावच्छेदकावच्छिन्नत्वोभयसंबंधेन वह्निव्याप्यत्वातिरिक्तं सत्‌ यद्यद्धूमत्वातिरिक्तं न तदवच्छिन्नप्रति-
योगिकप्रकारतानिरूपिताभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यत्वे विशेष्यतायां निवेश्य वह्निव्याप्यत्वावच्छिन्नाभावधूमत्वावच्छि-
न्नाभाववद्वह्निव्याप्यधूमत्वावच्छिन्नाभावकोटिकसंशयानां वारणं तथा धूमत्वावच्छिन्नाभावप्रकारकसंशयान्यत्वस्य पृथग्विनिवेश-
ह्या वस्तुतो वह्निव्याप्यत्वावच्छिन्नाभाववद्वृत्तिवह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वादिरूपाप्रामाण्य
ग्रहाभावानां सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकानां परामर्शहेतुतावच्छेदककोटिप्रवेशे प्रत्येयते विधेयतावच्छेदकनि-
ष्ठप्रत्यासत्त्या। विधेयतावच्छेदकनिष्ठप्रत्यासत्त्यवच्छिन्नप्रतियोगिताकतदभावानां विधेयतावच्छेदकनिरूपितसामानाधिकरण्य-
संबंधेन विधेयतावच्छेदकनिष्ठप्रत्यासत्त्यवच्छिन्नपरामर्शीयहेतुतावच्छेदकत्वं विधेयतावच्छेदकनिष्ठप्रत्यासत्त्या स्वनत्रहेतुतानस-
भवति। नो दूरगाप्रामाण्यज्ञाने विधेयतावच्छेदकविधेयतायाः हेविधायाम्रूपकविधिविषयतायाः प्रतियोगितावच्छेदकसंबंधांगीका-
रोऽन्यथा विधेयविषयतायां वह्नित्वविषयता तं दिशा निवेशस्याव० रूपकत्वात्‌। अन्यथा लोकव्याप्यत्वावच्छिन्नप्रकारतानिरूपित-
वह्निव्याप्यत्वावच्छिन्नाभाववद्वृत्तिपर्वतत्वावच्छिन्नविशेष्यताकत्वस्याव गाहिज्ञानकालेऽनुमित्युपपादनासंभवापत्तेरलं निवेशे-
न।

चपक्षतावच्छेदकभेदेन विधेयतावच्छेदकभेदेनापि कार्यकारणभावकल्प्याह। विधेयतावच्छेदकनिष्ठप्रत्यासत्त्यादरणस्य निष्फलत्वादेवं
न्नाद्यनुमानप्रामाण्यग्रहाभावानां आत्मनिष्ठप्रत्यासत्त्या हेतुहेतुमद्भावे तत्कल्पनादरे पि पक्षतावच्छेदकविधेयतावच्छेदकोभय
भेदेनानंतहेतुताकल्पने प्रसक्तगौरवपराहतत्वादिति प्रागुपदर्शितविशेष्यतावच्छेदकनिष्ठनिष्ठसंबंधावच्छिन्नप्रतियोगिताकतद
भावस्य विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्यानुमितिहेतुत्वकल्पनमेवोचितं। इत्थं च परामर्शस्यापि विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या हेतु
त्वं युज्यते ननु विधेयतावच्छेदकनिष्ठप्रत्यासत्त्या। तथा सति सामग्र्या ह्यो विशेष्यतावच्छेदकतासंबंधेनानुमित्युत्पादिकायास्त
दनुमानप्रामाण्यग्रहाभावघटितसामग्र्याः एककालीनत्वसंबंधेन तत्रैव विधेयतावच्छेदकनिष्ठप्रत्यासत्त्या फलजनकीभूतपरा
मर्शघटितसामग्र्यां निवेशनीयतया वह्निव्याप्यतावच्छिन्नाभाववद्धूमवान् निवह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्न
विशेष्यताकत्वादिरूपाप्रामाण्यग्रहदशायामपि द्रव्यत्वादिना सद्भावस्यैककालीनत्वसंबंधेन वह्निव्याप्यवान्पर्वत इत्या
दिपरामर्शे वैशिष्ट्यसत्त्वात्। अस्तु वा विनिगमनाविरहेण पर्वतत्वावच्छिन्नविशेष्यतानिरूपितविधेयकतावच्छेदकतासंबंधे
न वह्नित्वावच्छिन्नानुमितिस्यादसंग्रहात् विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या हेतुहेतुमद्भावसंबंधेन कार्योत्पादयोः परामर्शप्रामा २२
ण्यग्रहाभावयोः स्वीयकारणेनावच्छेदकसंबंधेनैकाधिकरणपत्नयोरेव विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या फलोत्पादप्रयोजकी धर्मि

मूलसामग्रीघटकतया नोपदर्शितस्थले पर्वतत्वविशेष्यतावच्छेदकतासंबंधेनानुमित्यापत्तिस्तत्राप्यामाराप्यहाभावसत्वे न तत्र कसामग्र्यास्ववाभा
वात्। अस्तु वा विनिगमनाविरहादुभयस्य सामग्र्येव हेतुहेतुमद्भावः पृथगपि आत्मनिष्ठप्रत्यासत्तिकल्पनापेक्षया लाघवमस्तु समवेतत्व
त्वादिना आत्मनिष्ठप्रत्यासत्तिकल्पना विधेयतावच्छेदकपक्षतावच्छेदकयोरेकत्र निवेशाहूपर्वतत्वादिरूपेकैकपक्षतावच्छेदके निवेशयव
वह्नित्वद्रव्यत्वादिसहस्रविधेयतावच्छेदकभेदेन कार्यकारणभावाः सहस्रमिति सहस्रपक्षतावच्छेदकभेदाहू सहस्रगुणितसहस्रका
र्यकारणभावाः अस्माकं तु सहस्रद्वयमात्रं न तत्कल्पनापेक्षया विधेयतावच्छेदकपक्षतावच्छेदकयोर्निवेशे पक्षमात्रकार्यकारणभावं च मात्र
ल्पनाहृ एतेन विशेष्यतावच्छेदकप्रत्यासत्तिघटकस्य विशिष्टविशिष्ट्यनिवेशानमावश्यकं। अन्यथा पर्वतत्वेनैकपर्वतत्वविशेष्यकपरामर्शा
त्पर विशेष्यकानुमित्यापत्तेरेव च विशिष्य विशिष्य विशेष्यतावच्छेदकतया प्रत्यासत्त्या विशेष्यतावच्छेदकविशेषणं निवेश्य पर्वतत्वावच्छि
न्नविशेष्यकस्वरूपविशेष्यनिष्ठप्रत्यासत्त्या कार्यकारणभावः कल्प्यते तत्र विनिगमनाविरहादुभयप्रत्यासत्त्या हेतुत्वकल्पने च विशे
ष्यतावच्छेदके विशेषणनिवेशत्वयोरवच्छिन्नविशेष्यभेदेनैव कारणतावच्छेदकत्वस्य वक्तव्यतयाऽतिगौरवान्न कल्पना विशेष्यतावच्छेदकमनि
वेश्य विशेष्यतावच्छेदकतप्रत्यासत्त्या विशेष्यमनिवेश्य चतरवच्छेदकतासम्बन्धावगाहकत्वहूयक कल्पने पर्वतत्वरूपेण न सर्वत्र द्रव्यत्वेन प
र्वतान्तरमवगाहमानात्परामर्शात्सर्वपर्वते न पर्वतान्तरं द्रव्यत्वेनेत्सर्वत्र मवगाहमानात् परामर्शात्पर्वतत्वेन पर्वतत्वावच्छिन्नं द्रव्यत्वेनेतस

वेनैव व्याप्तिमात्राया अनुमितेरापत्तिः। विशेष्यतावच्छेदकं निवेश्यैव विशेष्यतासम्बन्धे सैवानुविशेष्यं निवेश्य च विशेष्यतावच्छेदकताप्रकारतासत्त्वाद्धेतुता
याः कल्पनीयत्वादिसम्भिनिरस्तं। एतेन कुत्रचित् कार्यकारणभावे विशेष्यतावच्छेदकनिवेशोपि कृतः न द्भयानिवेशेनोपदर्शितरीत्याकोऽयंव
संभवादिति। द्रव्यं तु निविशते। सिद्ध्यादिनामात्मनिष्ठप्रत्यासत्त्यैव हेतुत्वमाश्रयत्वं तु विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या तथा च निरूपितत्वेन द्रव्यत्वा
द्यवच्छिन्नद्यवच्छिन्नपक्षकानुमितिप्रयोजकत्वं तु गगनानुमित्यानामेव ... उक्तानाप्रसंगेन गौरवात्। पूर्वं परामर्शस्यात्मनिष्ठप्र
23 त्यासत्त्या हेतुत्वकल्पने मा वह्निव्यापकं। यथा पर्वतो वह्निमानित्येतादृशसिद्धिकाले वह्निव्याप्यवान्पर्वत इत्यादिपरामर्शात्पर्वतो न तादात्विशे
ष्यतावच्छेदकतादिसंबन्धेनानुमितित्वावच्छिन्नापत्तिः। न च विशेष्यतावच्छेदकत्वादिसंबन्धेनानुमितिसुरतेन समवायादिसंबन्धेनानुमितिसुसा
दसामग्र्यप्यपेक्षितेति तादृशसामग्र्याः सिद्धाभावघटितत्वया तादृशसिद्धिकाले सत्ताप्रापत्तिरिति वाच्यं। द्रव्यं वह्निमद् इत्याकारकसि
द्धाभावघटितसामग्र्याः प्रतिसमवायसंबन्धेन वह्न्यनुमितित्वावच्छिन्नोत्पादकत्वया तादृशसामग्र्याः व न तदानीं सत्त्वेनापत्तेर्गौरवमनुम
त्यसत्त्वात्। अथ सिद्धिविशिष्टानुमितौ तादात्म्याः हेतुत्वं व्यवच्छेदपर्यवसितं गौरवाभावात् सिद्धेर्विशेष्यतावच्छेदकतात्मनिष्ठप्रत्यासत्ता 23
पि प्रतिबंधकत्वं संभवतीति नोक्तापत्तिरिति चेत् सा पूर्वमपि अस्यलिंगकत्वायाः आत्मनिष्ठप्रत्यासत्त्यैव प्रतिबंधकत्वं सम्भवति करणीयो न त्वानु
वादे व्याप्यत्वेऽक्तत्वस्य पक्षपरकत्वात्। ततस्तत्कालीनानुमितौ तथाविधे व्याप्यतानां न मद्। किंचैवं तत्र हेतुत्वे तत्कालीनपरार्थानरमाद्य धर्मि
हेतुना

पक्षविनिगमनाविरहेणानंतप्रसंगात्। न चैवमेकत्वमनेपि पदार्थांतरस्योक्तेऽकत्वमात्राय विनिगमनाविरह इति वाच्यं तत्रालौ
नवायुसंयोगादिरूपपदार्थांतरागामेकत्वे सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकतदभावस्यैवान्यलिंगकत्वा
यांनिवेशनीयत्वात्। तदपेक्षयाऽनुगततत्तल्लिंगकेच्छाभेदानिवेशे लाघवस्यैव विनिगमकत्वात्। विशेषचिंतेचेदमधि
कं पक्षताविचारेऽस्माभिरिति॥ इदमत्रावधेयं। अस्तु सिद्ध्यादीनां मानसनिष्ठप्रत्यासत्त्या प्रतिबंधकत्वं तथापि विशेष्यता
वच्छेदकतावच्छिन्नासमवायधर्मस्य हेतुत्वे बाधकाभावेन तथाहि पर्वतत्वेन सुरभित्वादिकं विषयीकुर्वंत्यानिवेशाय सामान्य
तः पर्वतत्वादिप्रकारकविषयतादिसंबंधेनानुमितित्वावच्छिन्नं प्रतिज्ञानत्वावच्छिन्नं प्रति स्वविषयपर्वतत्वादिवृत्तिविषयतयाज्ञा
नत्वेन पर्वतत्वादिज्ञानस्य हेतुता कल्प्यते। तथा च पर्वतत्वादिज्ञानसहकृतपरामर्शघटितसामग्र्येव पर्वतो वह्निमानि
त्याकारकानुमितिनिर्वाहिका। एवं च पर्वतो वह्निमानिति तादृशसिद्धिकाले पर्वतत्वज्ञानसहकृतपरामर्शघटितसाम
ग्रीबलात् पर्वते निर्विशेषणावच्छेदकतासंबंधेनानुमित्यापत्तिः संभवति। तादृशसामग्र्यास्तथाविधसिद्ध्यभावं विना कुत्रा
पि फलाऽजननात्। तादृशसामग्र्या चोक्तसंबंधावच्छिन्नसिद्ध्यभावस्यापि निवेशात्। नापि द्रव्यत्वादिज्ञानघटितसामग्रीबलाद्
महत्ज्ञानस्य विषयतया पर्वते तत्वेऽसत्वेन तत्र तादृशसामग्र्याऽव्यवहारोऽपि नवच्छिन्नत्वप्रकारकभेदेन पर्वतत्वज्ञानो

दीनामधिकरणताकत्वेन विशेषणतावच्छेदकताप्रत्यासत्तिकत्वे लाघवानवकाशात्। प्रात्मनिष्ठप्रत्यासत्तिकत्वमेव समुचितमिति वा
च्यं। प्रात्मनिष्ठप्रत्यासत्तेरनेकत्वे साध्यसाधनतादिभेदेन भिन्नपरामर्शहेतुतायां विशेष्यतावच्छेदकानिवेशनं तदपेक्षया पर्याप्तावच्छेदक
भेदेनाधिकैकैककार्यकारणतायाः परामर्शस्य स्वविशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या कारणतायाः कल्पनेन लाघवस्यातिस्फुटत्वादित्य
लमतिविस्तरेण। केचित्तु। परामर्शस्य कारणतावच्छेदकप्रत्यासत्तिस्तादात्म्यं। कार्यतावच्छेदकप्रत्यासत्तिस्तादात्म्यं सामानाधिक
रण्यं। न च सामानाधिकरण्यप्रत्यासत्त्यानुमितेरात्मवृत्तिपदार्थनिरूपितत्वेन समवायतादात्म्येन परामर्शस्य तादृग्व्यभिचार इति वाच्यं।
२५ धूमपरामर्शोत्पत्तिसामानाधिकरण्यप्रत्यासत्त्यानुमितिं प्रति धूमपरामर्शत्वादिना हेतुत्वे कल्पनेन व्यभिचारानवकाशात्॥
न चैवमपि कालान्तरीयधूमपरामर्शादावपि सामानाधिकरण्यसंबंधेनानुमितेरुत्पत्तेस्तत्र चाव्यवहितोत्तरत्वघटितादात्म्यस
स्य परामर्शसत्त्वेन व्यभिचार इति वाच्यं कालान्तरीणधूमपरामर्शादौ कारणतावच्छेदकसंबंधेन कारणाभावस्यापि सत्त्वे बहि
र्भूतक्षणोत्पत्तिसत्त्वेन व्यभिचारानवकाशात्। एवमपि लिंगकानुमितौ व्यभिचारानवकाशेऽर्थव्यवहितोत्तरत्वं कार्यतावच्छेदककोटौ नि
वेश्यं नतु तत्समवायप्रत्यासत्तिकत्वापेक्षया तादात्म्यघटितं वा समवायप्रतियोगिकत्वं लघु व्याप्यधूमवत्पर्वतविषयकत्वसंशया
न्यज्ञानत्वादीनामेव कार्यकारणतावच्छेदककोटौ निवेशनीयतया विशेष्यविशेषणभावविनिगमनाविरहेऽपि कार्यकारणभाव २७
बाहुल्यापत्तेः तन्मतेनुनेयानेकत्वनिवेशाः किंतु प्रत्येकं तद्धर्मावच्छेदेनैव नानैककारणताकल्पनं तदृति लाघवं भेदन्मते प्रत्येक धर्मि

त्वावच्छेदेन नानाहेतुत्वकल्पनं न संभवति तथा सति वह्निव्याप्यधूमवत्पर्वतादिविषयकसंशयस्य संशयापादकघटादिज्ञानस्य सत्त्वे
एवं वह्निव्याप्यधूमवत्पर्वतादिविषयकसंस्कारस्य घटादिज्ञानस्य च सत्त्वे सकलकारणानामवच्छेदकावच्छिन्नस्यैवात्मनि समवायप्र
त्यासत्त्या सत्त्वेन तत्र समवायेनानुमित्यापत्तिः स्वसमानेन च कारणतावच्छेदकीभूततादात्म्यप्रत्यासत्त्या तादृशकारणतावच्छेदकादि
त्रीयामेकत्रासत्त्वात्प्रसभावाद्बाधस्येककारणताकल्पनेनैव विद्धाधकमिति। अथैवं स्मृतेरेकस्य परामर्शस्य परामर्शभूस्यापि
आत्मनि सिद्ध्यभावादिवत्आत्मसमवायेनानुमित्यापत्तिः तदीयसामानाधिकरण्यसंबंधेनानुमित्युत्पादकसामग्र्याः पुरुषान्तरी
यपरामर्शादेर्वा सत्त्वादिति चेन्न। विषयसमनियतस्य सामानाधिकरण्यसंबंधेन तत्तदात्मीयानुमितिं प्रति आधेयतासंबंधेन तत्तदा
त्मत्वेन हेतुता कल्प्यते। एवं समवायसंबंधेन तत्तदात्मीयानुमितिं प्रति तादात्म्यप्रत्यासत्त्या तदात्मत्वेनापि एवं च तादात्म्यप्र
त्यासत्त्या तत्तदात्मसहकृतसिद्ध्यभावादिघटितसामग्र्यैव समवायेनानुमित्युत्पादकत्वमपेक्षितं कालान्तरभाव्यासामग्रीयाणां म
ध्ये यत्तद्घटकत्वे सत्या तत्तदात्मसहकृतपरामर्शरूपायाः सामानाधिकरण्यप्रत्यासत्त्यानुमित्युत्पादिकायाः सामग्र्याः पेक्षकाली
नत्वसंबंधेन वैशिष्ट्यं निवेशनीयं। एवं च पुरुषान्तरीयपरामर्शादेस्तु न यापरामर्शभूम्येपि तदात्मनि तत्तदात्मसहकृतसिद्ध्यभा
भावादिघटितसामग्र्यैव त्वात्समवायेनानुमितिरापादनीया न तु न संभवति तत्सहकारिण्याः सामानाधिकरण्येनानुमित्स्व

सादृकीभूतपन्नतादात्म्यघटितसामग्र्याः कुत्राप्यसंभवात् नहि पुरुषांतरीयपरामर्शेनान्यसामग्रीनिर्ननेतन्नाधेयतयाऽनतादात्म्येनोऽभा
वात्। एवं चान्यात्म निसिद्ध्यभावादिसत्वेसिद्ध्यादिमतादात्म्यसमवेतपरामर्शेक्षामानाधिकरण्यप्रत्यासत्त्याऽनुमित्यापत्तिः समवायेना
नुमित्सासादृकीभूतसिद्ध्यभावादिघटितसामग्र्याः अन्यात्मनेव ननतादात्म्यसत्वादिस्य पिपराम्शी निरीयपरामर्शेक्षामानाधिकरण्य
संबंधेनानुमित्सासादृश्ययोऽकीभूतन्नतादात्म्यसहकृतपरामर्शात्मकसामग्रीव्यात्मसमवायेनानुमित्सासादृकतन्नतादात्म्यसहकृ
तसिद्ध्यभावादिरूपसामग्र्याअपि निवेशात्। नान्यात्मसामग्र्याअन्नतदानीं कुत्राप्यसत्वेनापत्त्यसंभवात् नहि नान्यात्मसामग्रीं नदा
नीमन्यात्मनिवर्ननेतन्नतादात्म्ये नन्नतादात्म्येनोऽभावात्। नापि तदात्मनिसिद्धिसत्तादिति। न चैवमाधेयत्व[redacted] नादात्म्यप्रत्यासत्तिमा
नन्नतादात्म्ये नानंतानामात्मनां हेतुत्वकल्पनाधिक्यादेतन्मतेगौरवमिति वाच्यं समवायप्रत्यासत्तिकल्पे विषयभेदेनचभि
न्नासु परामर्शहेतुतासु पूर्वं प्रदर्शितविनिगमनाविरहेणौताधिक्यात्तदपेक्षया आत्मव्यक्तिभेदेनोपदर्शितकारणता। २५
कल्पनस्यैवोचितत्वादित्याहुः॥ ५॥ ×नंतकारण× इति धर्मितावच्छेदकताप्रत्यासत्तिः धर्मि